UGC - CARE LISTED

ISSN: 0974-8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

(A Refereed & Peer-Reviewed Quarterly Research Journal)

45 वर्षे तृतीयोऽङ्कः (जुलाईमासाङ्कः) 2020

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

केन्द्रीयविश्वविद्यालयः

नवदेहली-16

UGC- CARE Listed ISSN : 0974-8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

(A REFERRED & PEER- REVIEWED QUARTERLY RESEARCH JOURNAL)

45 वर्षे तृतीयोऽङ्कः (जुलाईमासाङ्कः) 2020 ई.

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

नवदेहली-110016

प्रकाशकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

कुतुब-इन्स्टीट्यूशनल-एरिया, नवदेहली-110016

ISSN :- 0974 - 8946

45 वर्षे तृतीयोऽङ्कः (जुलाईमासाङ्कः) 2020 ई.

बेवसाइटसङ्केतः - www.slbsrsv.ac.in

ई-मेलसङ्केतः - shodhaprabhalbs@gmail.com

दूरभाषसङ्केतः - 011-46060609, 46060502

सूचनाः - लेखकाः स्वशोधपत्रे दूरभाषाङ्काः अवश्यं लेखनीयाः

मुद्रकः - गणेशप्रिंटिंगप्रेसः, कटवारियासरायः, नवदेहली-16

शोधप्रभा
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य
अनुसन्धान-प्रकाशन-विभागीया शोध-पत्रिका

- एषा त्रैमासिकी शोध-पत्रिका।
- अस्याः प्रकाशनं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबरमासेषु भवति।
- अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धान-प्रवृत्तेरुद्बोधनं प्रोत्साहनं विविधदृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च विद्यते।
- अस्यां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।
- अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादनभावानुवादटीका-टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।
- शोधपत्रलेखकाः शोधपत्रस्यान्ते पत्राचारसङ्केतः दूरभाषसंख्या, ईमेलसङ्केतश्च अवश्यं लेखनीयाः।
- पत्रिकायाः एका प्रतिः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।
- अस्यां पत्रिकायां विशिष्टानां संस्कृत-हिन्द्याङ्ग्ल-ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। आलोच्यग्रन्थस्यालोचना यस्मिन्नङ्के प्रकाशिता भवति सोऽङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते किञ्च समालोचनापत्राण्यपि यथासौविध्यं दीयन्ते। प्रकाशित-शोधसामग्री लेखकस्यास्ति अतः लेखस्य मौलिकतादिविषये सम्पूर्णं दायित्वं लेखकस्य भविष्यति न तु सम्पादकस्य न वा प्रकाशकस्य।
- पत्रिकासम्बद्धन्यायालयीयविवादविषये दिल्लीन्यायालयक्षेत्रमेव परिसीमितमस्ति।
- अस्या एकाङ्कस्य मूल्यम् रु. 125.00, वार्षिकसदस्यताराशिः रु. 500.00 पञ्चवार्षिकसदस्यताराशिः रु. 2000.00, आजीवनसदस्यताराशिः रु. 5000.00
- सदस्यताराशिः **कुलसचिव, श्रीलाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय,** नई दिल्ली-16, इति सङ्केतेन (बैंकड्राफ्ट अथवा मनीआर्डर) द्वारा प्रेषणीयः वा ई-बैंकमाध्यमेन देयः।
- पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **'सम्पादक' शोध-प्रभा'** **श्रीलाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय (केन्द्रीय विश्वविद्यालय), कटवारिया सराय,नई दिल्ली- 110016** इति सङ्केतेन विधेयः।

सम्पादकः

नैवेद्यम्

संस्कृतिः संस्कृताश्रिता, उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद् भारतन्नाम भारती यत्र सन्ततिः॥ आचारः परमो धर्मः। आचारहीनं न पुनन्ति वेदाः। इत्यादिदिव्यवचनैः संस्कृतेः संस्कृतस्य च वैशिष्टयं शास्त्रेषु पदे-पदे वर्णितम्।

भारतीयसंस्कृतौ संस्कारस्य महत्त्वपूर्णं स्थानं विद्यते। वस्तुतः कार्यसम्पादनयोग्यता संस्कारादेव जायते। अस्मादेव कारणात् भिन्नाः संस्काराः भिन्नानां कार्याणां योग्यताधानहेतवो भवन्ति इति प्रसिद्धिः। वेदविहितविविधकार्यसम्पादनार्थं विविधाः संस्काराः धर्मशास्त्रकारैः समुपदिष्टाः सन्ति। तेषु शिक्षासम्बन्धिनोऽपि नैके संस्काराः सन्ति। संस्कारानामभावात् विद्याभ्यासोऽपि अनुदिनं क्षीयते। सत्यप्यभ्यासे तत्र तेजस्वितायाः अभावः सुतरां दृश्यते। तेजस्विनी विद्या न केवलं विद्यावतामुपकारायापितु समाजस्य देशस्य च लाभाय जायते। विद्यावतां तु सर्वकार्यसिद्धिसूत्रं विद्यैव भवति। उक्तञ्चास्ति-

श्रियः प्रदुग्धे विपदो रुणद्धि यशांसि सूते मलिनं प्रमार्ष्टि।
संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः किल कामधेनुः॥

आधुनिककाले भौतिकविज्ञानादिविषये प्रायः छात्राणां रुचिः जायते। इमाः सर्वाः विद्याः लोकोपकाराय किन्तु भौतिकजीवनमेवाधिकृत्य केवलम्। आध्यात्मिकजीवनविकासे मानवमूल्यविकासे च या विद्या अपेक्षिता सा भिन्नैव भवति। तस्याः विकासायैव 'षडङ्गो वेदोऽध्येतव्यः' इत्युद्घोषः महर्षिणां श्रूयते। वेदानामध्ययनं तदङ्गानां, तदुपकारकाणां शास्त्राणां सम्यक् परिशीलनेनैव भवति। 'वेदात्सर्वं प्रसिद्ध्यति' इति कथनस्येदमेव तात्पर्यं यत् ज्ञानस्य मूलं वेदेष्वेव प्रतिष्ठितमस्ति। तदेव ज्ञानं विविधेषु शास्त्रेषु भिन्न-भिन्नमार्गेण प्रकाशितं विलसति। शास्त्राणां माध्यमेन वैदिकज्ञानस्यैव परिप्रकाशः शनैः शनैः जायते।

संस्कृतस्य संस्कृतेश्च संरक्षणार्थं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य त्रैमासिकी ''शोधप्रभा'' नाम्नीयं शोधपत्रिका निरन्तरं प्रकाश्यमाना विद्यते। प्रकृतोऽयमङ्कः पाठकेभ्यः समर्प्य अहं सर्वेषां पाठकानां सहयोगीनाञ्च मांगल्यमुपदिशे।

प्रो. रमेशकुमारपाण्डेयः
कुलपतिः

सम्पादकीयम्

संस्कृतं भारतस्य जीवातुभूतं तत्त्वम्। अस्यां भाषायां विलसति विपुलं ज्ञानवैभवम्। अस्मिन् वाङ्मयेऽनुस्यूतं सकलमपि जीवनमूल्यं, निखिलमपि व्यवहारतत्त्वम्। कथं वयं जीवामः? कथं वयमाचरामः? कथं वयं व्यवहरामः? किमस्त्यस्माकं लक्ष्यम्? किं कर्म? किमकर्म? किं हानम्? किमुपादेयमेतत् सर्वं सम्यगुपदिशति सुरभारती देववाणीसंस्कृतम्।

पुरा अस्माकं देशस्यासीत् किमप्यपूर्वं गौरवमिह जगति। तत्र हेतुरासीत् जनमानसे संस्कृतस्य व्यापकत्वेन प्रभावः। एतत्प्रभावादेव मौलिभूतं स्थानमासीदस्माकमिहावनितले। ऋषीणां वैशिष्ट्यं, मुनीनां महत्त्वं, गुरूणां गुरुत्वम्, आचार्यणामाचार्यत्वमेतत्प्रभावादेव प्रसिद्ध्यति। संस्कृतमन्तरा क्व संस्कृतिः? क्व संस्कारः? क्व सदाचारः? क्व च शुचिता इति?

संस्कृतस्य गुरुत्वादेवासीदास्माकं गौरवम् अधिगतञ्चास्माभिः विश्वगुरुत्वम् इयमस्मान् प्रतिपदं संस्करोति शिक्षयति च कथं पितृभ्यां सह प्रभवामः? आचार्येण सह कथमाचरामः? भ्रातृभिः भगिनीभिश्च सह कथं भवामः? तरुगुल्मलताकीटपतङ्गप्रभृतिप्राणिभिस्सह कथं वर्तामहे? एतत्सर्वमत्यन्तं सारल्येन मृदुवचनेन चोद्बोधयति। भारतीयानां जीवने प्रतिपदं संस्कृतस्य महानुपकारः। इयं विद्या कल्पतलतेवास्माकं जीवने सर्वमभीष्टं संसाधयति। **वसुधैव कटुम्बकम्, संगच्छध्वं संवदध्वम्, सर्वे भवन्तु सुखिनः, मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे, लोकाः समस्ताः सुखिनो भवन्तु** इत्यादिवचनपुञ्जैर्विज्ञापितायाः विश्ववन्धुत्वभावनायाः चिन्तनमेतस्याः सर्वातिशयत्वं द्योतयति।

अतः सर्वैरपि मानवैः आत्मगौरवाय, विश्वकल्याणाय, सुखाय, शान्त्यै, समृद्ध्यै च संस्कृतं सततं पठनीयं, चिन्तनीयं, मननीयम्, आश्रयणीयञ्च।

विश्वविद्यालयानुदानायोगेन स्वीकृतासु सन्दर्भितशोधपत्रिकास्वन्यतमा श्रीलालबहादुर-शास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य त्रैमासिकी शोधपत्रिका "शोध-प्रभा"। इयं विगतेभ्यः पञ्चचत्वारिंशद्वर्षेभ्यः नैरन्तर्येण मौलिकोत्कृष्टान्वेषणान्वितशोधपत्रप्रकाशनपरायणा अनुसन्धानक्षेत्रे विशिष्टं स्थानं बिभर्ति। पत्रिकेयं संस्कृतविदुषामनुसन्धित्सूनां छात्राणाञ्च चिन्तनप्रकर्षप्रकाशनाय अनुद्घाटितज्ञानवैभवस्योद्घाटनाय च महोपकारिकेति मे दृढीयान् विश्वासः।

शोधप्रभायाः प्रकृतेऽस्मिन्नङ्के नैकविधविषयगाम्भीर्यमण्डिताः षोडशशोधनिबन्धाः प्रकाश्यन्ते। प्रखरप्राञ्जलप्रतिभासम्पन्नैः नदीष्णैः सुधीभिः अनुसंन्धानपद्धतिमाश्रित्य तत्तद्विषयेषु गवेषणापूर्वकं मौलिकमपूर्वञ्चान्वेषणमनुष्ठितम्। अनुसन्धानपथि प्रवृत्तानामाचार्याणामनुसन्धातॄणाञ्च प्रतिभाप्रगल्भेन शोधप्रभायाः 'प्रभा' सर्वत्र विलसत्विति कामयमानोऽहं निकषधिषणापूरित-विषयवस्तुजातस्य प्रकाममुद्बोधनाय सम्प्रार्थये सरस्वतीसपर्यापरान् विद्याविनयविभूषितान् विशिष्टान् विदुषः।

प्रो. शिवशङ्करमिश्रः
शोधविभागाध्यक्षः

विषयानुक्रमः

संस्कृतविभागः

हिन्दी विभाग

English Section

औत्कलीय-तान्त्रिकसाहित्यस्य काश्मीरान् प्रति आधमर्ण्यम्

डॉ. गयाचरणत्रिपाठी*

प्रायो विंशतिवर्षेभ्यः प्राङ् मामकीनस्य पुत्रस्य व्रतबन्धप्रसङ्गेऽहं प्राचीना हस्तलिखिता उपनयनपद्धतीरन्वेषमाण आसम् याः अनुसृत्य, व्रतबन्धसंस्कारः समीचीनतया धर्मशास्त्रोक्तरीत्या च संपद्येत। कस्यचित् पारिवारिकसुहृदो गृहादस्माभिरीशवीयसप्तदशशताब्द्यां विरचितं पद्धतिद्वयं समासादितम्। तत्र व्रतबन्धसंस्कारस्य निरूपणानन्तरमुपसंहाररूपेण विद्यमानं यद्वाक्यमपश्यम् तदैतिहासिकदृष्ट्या, विद्यानां विकासदृष्ट्या चातीवरोचकं बोधिमयं चासीत्। तत्त्वित्थम् – ''ततो वटुरध्ययनार्थं काशीं काश्मीरान् वा गच्छेत्'' इति। अत्र वैचित्र्यं त्विदं यत् सप्तदशशताब्द्यामपि भारते काश्मीरप्रदेशो विद्यायाः केन्द्रत्वेन प्रसिद्ध आसीद् यद्यपि ततः पूर्वं प्रायः शतत्रयं वर्षाणि यावन्मोहम्मदीययवनानामाधिपत्ये सोऽतिष्ठद्, येनार्यधर्मस्य शास्त्रीयविद्वत्परम्परायाश्च तत्र कदाचिदतीवस्वल्पमात्रवेमावशिष्टमासीत्।

चतुर्दशशताब्दीं यावत् काश्मीरप्रदेशः आर्य-सौगतदर्शनयोश्च विशिष्टं सुप्रसिद्धं च केन्द्रमासीदिति जानन्त्येव पुराविदो विद्वांसः। द्वादशशताब्द्याः पूर्वार्द्धे विद्यमानो नैषधकारो महाकविः श्रीहर्षः साटोपं गर्वनिर्भरचेतसा च स्वकीयं काव्यं प्रशंसन् ब्रूते यत्तस्येदं नैषधीयचरिताख्यं काव्यं तैः काश्मीरिकैर्विद्वद्भिः प्रशंसितं समादृतं चाभवद् ये चर्तुदशविद्यासु प्रवीणाः सन्ति –

'काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महाकाव्ये तद्भुवि नैषधीयचरिते' ...
(१६/१३१)

विद्यार्जनस्य, वैदुष्यस्य, शास्त्ररक्षणपोषणयोश्चैषा परम्परा काश्मीरेषु विक्रमसंवत्सरस्य प्रागेव दृढं स्थापिताऽभूद् यदा 'प्रियदर्शिना' अशोकेन सौगतधर्मस्य प्रतिष्ठापनार्थं सुबुद्धाः बौद्धभिक्षवस्तत्र प्रेषिताः। पश्चिमोत्तरत आगत्य राजाधिराजेन कुषाणवंशीयेन कनिष्केणापि काश्मीरेषु श्रीनगरस्य स्थापनां कृत्वा तृतीया बौद्धसंगीतिस्तत्रायोजिता। तदनन्तरं काश्मीरप्रदेशो बौद्धमहासांघिनां विशिष्टकेन्द्रत्वेन प्रतिष्ठामवाप। संस्कृतभाषया सर्वास्तिवादिनां

*निदेशकः भोगीलाललेहरचन्द इन्स्टीट्यूट ऑफ इण्डोलॉजी,
विजयवल्लभस्मारकः, जी.टी. करनालरोडः, पोस्ट अलीपुरम्, देहली-110036

नैके ग्रन्था अत्रैव प्रणीताः सन्तः, बौद्धभिक्षुभिरत एव चीनादिदेशान् नीतास्तत्रत्यासु भाषास्वनूदिताश्चाभवन्।

किन्तु काश्मीरप्रदेशस्यावदानं केवलं सौगतमतस्य पल्लवनं प्रसारणं च यावन्नैव परिसीमितम्। सनातनवैदिकपरम्पराया अपि विविधाः सम्प्रदाया अत्र कमप्यभूतपूर्वं विकासमापुः। शैव-शाक्ततन्त्रेषु लोकोत्तरप्रतिभाजुषां वसुगुप्त-सोमानन्द-कल्लटोत्पलाभिनवगुप्तादीनां कृतयो विश्वस्मिञ्जगत्यधीयन्ते समाद्रियन्ते च। किन्तु नैतत् सर्वेषां सम्यक्तया विदितं यद् वैष्णवधर्मस्य तत्साहित्यस्य च-विशेषतः पाञ्चरात्रसंहितानाम्-आदिमा जन्मस्थली अपि काश्मीरा एव। सुदूरवर्तिनि तमिलनाडुप्रदेशे एकादशशताब्द्यां वर्तमानाः श्रीमन्तो यामुनाचार्यपादाः स्वकीये 'आगमप्रामाण्यम्' इति नाम्नि ग्रन्थे काश्मीरानेव पाञ्चरात्रतन्त्रस्य जन्मभूमिं स्वीकुर्वन्तो वैष्णवागमिमं 'काश्मीरागम' इत्यभिधेयेनालङ्कुर्वन्ति। सात्त्वत-पौष्कर-जयाख्यानां 'रत्नत्रयम्' इति संज्ञया विश्रुतानां प्राचीनतमानां पाञ्चरात्रसंहितानाम् उद्गमस्थानं काश्मीरा एव, यत्तु तासां पाठस्य सम्यक्समालोचने कृते आन्तरिकैः प्रमाणैरवभासते। तद् यथा –

पौष्करसंहितायां, दिक्षु विदिक्षु च कलशस्थापनप्रसङ्गे, कस्मिन् कस्मिन् कलशे कस्याः कस्या नद्या आवाहनं कर्त्तव्यमित्यस्य विवेचनक्रमे निर्देशो वर्तते यन् मकरारूढाया गंगाया आवाहनं पूर्वस्यां, कूर्मारूढाया यमुनाया आग्नेय्यां, सरस्वत्या दक्षिणस्यां, नर्मदाया नैर्ऋत्याम्, इरावत्याः ('रावी' इति भाषायां प्रसिद्धायाः) वायव्यां, सिन्धोरुत्तरस्याम् अथ च वितस्तायाः ('झेलम') ऐशान्यां दिशि कर्त्तव्यं यतः तास्वेव दिक्षु एताः प्रवहन्ति। भौगोलिकदृष्ट्या समालोच्यमाने सति स्पष्टं प्रतिभाति यत् स देशभागो यत्र नदीनामेषावस्थितिर्वर्तते काश्मीरा एव। तत्रैव सिन्धुः कैलाशसमीपेऽवस्थिताया हिमान्याः प्रभवन्ती काश्मीराणामुत्तरतः प्रवहति, अनन्तरं सा अधित्यकातः समतलभूभागमवतरन्ती भारतभूमेः पश्चिमस्यां दिशि प्रवहन्ती सागरेण संगच्छते। अन्यासामपि सरितां स्थितिः काश्मीरान् प्रत्येवाङ्गुलिनिर्देशं कुर्वती प्रतिभाति।

वटोदर (बड़ोदा) - नगरात् प्रकाशितायाः जयाख्यसंहितायाः परिष्कर्तारः सम्पादकवर्याः श्रीविधुभूषणभट्टाचार्यमहाभागा अपि अस्याः संहिताया उद्गमस्थानरूपेण काश्मीरप्रदेशमेवोररीकुर्वन्ति। तत्र बीजाक्षररूपेणोपयुज्यमानानां वर्णानामभिधानानि विशेषणानि च सूक्ष्मेक्षिकया समालोच्य एभिर्विद्वद्भिः स्वकीयायां ग्रन्थभूमिकायां प्रत्यपादि यदेतेषामक्षराणामभिधानानि विशेषणानि च बीजाक्षराणां तान्येव स्वरूपाणि तांश्चैवाकारान् प्रकटयन्ति ये ब्राह्माक्षरेषु (ब्राह्मीलिपौ) भारतवर्षस्य पश्चिमोत्तरभूभागे चतुर्थ्यां शताब्द्यां प्रचलिता आसन् – यथा रकारस्य काश्मीरेषु तात्कालिकं स्वरूपमुद्गच्छदग्निशिखावद् दरीदृश्यते, अत एव रकारोऽग्निबीजमित्यादि।

एवमेव औटो श्राडर्-महोदयेनापि अड्यार पुस्तकालयतः प्रकाशिते स्वकीये 'इन्ट्रोडक्शन टु पाञ्चरात्र एण्ड अहिर्बुध्न्यसंहिता'-नाम्नि पाञ्चरात्रपरिशीलनात्मके

सर्वप्रथमे ग्रन्थेऽहिर्बुध्न्यसंहितान्तर्गतानां प्रमाणानां साहाय्येन साधितं यत्तस्याः संहितायाः रचना काश्मीरेष्वेव कृता वर्तते।

पाञ्चरात्रसम्प्रदायस्य कश्चिद् भूयिष्ठं समादृतो ग्रन्थो 'लक्ष्मीतन्त्रं' नाम। अस्मिन् ग्रन्थे काश्मीरशैवदर्शने सर्वप्रथमं पल्लवितस्य पुष्टस्य च 'शक्तिपाता'ख्यसिद्धान्तस्य वैष्णवमतेऽपि सुतरां महत्त्वं प्रतिपादितं दृश्यते यत्त्वस्य ग्रन्थस्य तेनैव देशेन सह द्रढीयांसं संबन्धं संसूचयति। काश्मीरेषु आर्याणां शासनकाले भूयांसो वैष्णवदेवालया आसन्। तेषां भग्नावशेषास्तु अद्यापि तिष्ठन्ति, यत्र तत्र दृष्टिपथमायान्ति च। वैष्णवपरिवारस्य बहवो देवविग्रहा अपि अक्षता विखण्डिता वा यत्र-तत्र प्राप्यन्ते, बहवस्तत्रत्येषु संग्रहालयेष्वपि द्रष्टुं शक्यन्ते। शैवागमे सुप्रतिष्ठस्य 'स्वच्छन्दशास्त्र'स्य वैष्णवमतानुसरिणी व्याख्यापि समुपलभ्यते। एकादशताब्द्यां लब्धजन्मना 'उत्पलवैष्णवा'ख्येन विदुषा कल्लटस्य 'स्पन्दकारिका'ख्यग्रन्थमुपजीव्य 'स्पन्दप्रदीपिका' नाम ग्रन्थरत्नं प्राणायि यत्र पाञ्चरात्रसंहिताभ्यो नैकानि पद्यान्युद्धृतानि सन्ति।

शिल्पशास्त्रदृष्ट्या अप्रतिमस्य प्रासाद-प्रतिमादिलक्षणप्रतिपादनपरस्य 'विष्णुधर्मोत्तर'-पुराणस्य जन्मस्थली अपि काश्मीरप्रदेशः इति पुराणविदां पुरातनं, सर्वमान्यं च मतम्। भगवतो विष्णोस्तत्संबन्धिकथानां महत्त्वं, पुण्यानां काश्मीरेष्ववस्थितानां वैष्णवतीर्थानां वैशद्येन विवरणं बिभ्रन् 'नीलमतपुराण'मपि काश्मीरप्रदेश एव विरचितमभूदित्यत्र नास्ति काचित् संशीतिर्विदुषाम्। वैष्णवानां शैवानां सौगतानाञ्च सौमनस्येन सौहार्देनात्र स्थितत्वात् परस्परं विचारविनिमयाच्च अत्र विरचितेषु ग्रन्थेषु समेषां मतानां यः समन्वयः प्रायः समुन्मीलति स त्वन्यत्र दुर्लभ एव। 'दशावतारचरितस्य' कविः क्षेमेन्द्रो 'बौद्धावदानकल्पलताया' अपि रचयिता इत्यत्र निदर्शनम्।

इदानीमुत्कलान् प्रतिष्ठामहे। उत्कलप्रदेशीयधार्मिकसम्प्रदायानां विविधान् ग्रन्थान् हस्तलेखांश्चालोडयतामस्माकं दृष्टिपथमापतितं यत् प्रायः सर्वेऽपि शैवा, वैष्णवाः, शाक्ताश्च वास्तुशास्त्र-शिल्पशास्त्रग्रन्थाः, अथ च प्रासादप्रतिष्ठाग्रन्थाः पाञ्चरात्रग्रन्थेषु अन्यतमं, 'हयशीर्षपाञ्चरात्र'मेव स्वकीयोपजीव्यत्वेन स्वीकुर्वन्ति। बहवो ग्रन्थाः हयशीर्षस्य नामोल्लेखमपि स्वकीये शीर्षकेऽभिधाने वा कुर्वते, यथा – 'श्रीहयशीर्षपाञ्चरात्रोक्त-शैवप्रासादप्रतिष्ठा-विधिः' 'श्रीपुरुषोत्तमजगन्नाथस्य हयशीर्षोक्तनेत्रप्रतिष्ठाविधिः' 'श्रीहयशीर्षोपवर्णितो वनयाग-विधि'रित्यादयः। एतादृशेषु ग्रन्थेषु बहवो स्वकीयेऽभिधाने हयशीर्षपाञ्चरात्रमनुल्लिख्यापि पुष्पिकायाम् 'इति श्रीहयशीर्षोक्तः अमुक-विधिः' इत्येवं संसूच्य एतन्महाग्रन्थं प्रति स्वकीयामधमर्णतामुररीकुर्वन्ति।

अत्रेदं मनसि निधातव्यं यद् ये ये ग्रन्थाः हयशीर्षपाञ्चरात्रमनुसरन्ति, तदुपजीव्यत्वेन च कल्पयन्ति, तेऽतीव प्राचीनाः ईशवीयपञ्चदशशताब्दीतश्च प्राचीनतराः। ईशवीयषोडश-शताब्द्यामुत्कलेषु धर्मशास्त्रस्य पण्डितप्रकाण्डः श्रीनरसिंहवाजपेयी धर्मशास्त्रविषयकान्

बहून् ग्रन्थान् निर्ममे। उत्कलदेशाभिजनोऽयं स्वकीये प्रदेशे प्रचलितदेशाचारं, देवोपासनाविधिं च सम्यक्तया समीक्ष्य, स्वीकृत्य च तांस्तान् ग्रन्थान् विरचितवान् अतः द्रागेव जनाः प्राचीनान् हयशीर्षानुसारिणो ग्रन्थान् परित्यज्य नरसिंहवाजपेयिप्रणीतान् ग्रन्थान् सोत्साहमङ्गीचक्रुः। ततः प्रभृति तस्यैव ग्रन्थानधिकृत्य प्रतिष्ठापद्धतयः पूजापद्धतयश्च प्रणीता बभूवुः। वाजपेयिना नरसिंहेन 'प्रतिष्ठाप्रदीपा'ख्यो यः प्रख्यातो ग्रन्थः प्राणायि तमेवोपजीव्यत्वेनोपकल्प्य भगवद्विग्रहप्रासादादीनां च प्रतिष्ठा प्रावर्तत तदनन्तरम्।

हयशीर्षान्नूनं निवृत्य प्रकृतमनुसरामः। दौर्भाग्यमेतद् यन्नायं ग्रन्थः सम्पूर्णतयोपलभ्यते, न चापि उपलभ्यमानोंऽशः साकल्येन प्रकाशितः। प्रतिकाण्डमवसाने वर्तमानायां पुष्पिकायां हयशीर्षस्योल्लेखो 'दशसाहस्रीसंहिता' रूपेण वर्तते किन्तु ततः केवलं षट्सहस्रश्लोकसंवलितश्चतुः- काण्डात्मको भाग एव प्राप्यते, तस्य चापि एका एव पूर्णा मातृका उत्कलदेशस्थ-गञ्जामनगरात् प्राप्ता सती 'अड्यार'पुस्तकालये (मद्रपुर्यां स्थिते) विद्यते। ततः प्रतिलिपीकृत्य 'एशियाटिक-सोसाइटी' (कालिकाता) प्रभृतिसंस्थानैः कैश्चिदन्यैश्च स्वकीयेषु ग्रन्थागारेषु सा आनायिता। ग्रन्थस्य पूर्वार्द्धस्य, प्रतिष्ठा-लिङ्गाख्ययोः प्रथमद्वितीय-काण्डयोः मातृकास्तु बङ्गोत्कलमैथिललिपिष्वपि प्राप्यन्ते किन्तु ताश्चापि द्वित्रा एव।

अस्य पाञ्चरात्रस्य प्रथमं काण्डं तावत् 'प्रतिष्ठाकाण्डम्' यत्र प्रायः सर्वासां देवप्रतिमानां प्रतिष्ठाविधिर्वर्तते, तदनन्तरं लिङ्गकाण्डे शिवपरिवारान्तर्गतानां विविधानां विग्रहाणां स्वरूपादिकं, ततः संकर्षणकाण्डे वैष्णवीनां मूर्तीनां लक्षणानि स्वरूपं च, अन्तिमे सौरकाण्डे सूर्योपस्थापनं तत्संबन्धिन उत्सवाश्च वर्णिताः। पाञ्चरात्रग्रन्थेषु प्रायः भगवतो विष्णोरेव चर्चा भवति न त्वन्येषां देवानाम्। अनुमीयते यदयं ग्रन्थः एतादृशि कस्मिंश्चिद् देशे प्रादुर्भूतो यत्र सर्वेऽपि इमे देवाः पूज्या अर्चनीयाश्चासन्।

भगवतः सूर्यदेवस्योपासनं प्राचीने भारते ईशवीयैकादशशताब्दीपर्यन्तं देशस्य पश्चिमोत्तरभागे एव प्रचलित आसीत् यत्र 'मूलस्थानम्' इति नाम्नि नगरे—इदानीं पाकिस्तानदेशे स्थिते 'मुल्तान' इत्याख्ये—चन्द्रभागानदीतीरे सूर्यदेवस्यातीवप्रख्यातो देवालय आसीद् यस्तु तस्यामेव शताब्द्यामाततायिना 'महमूद गज़नी' इत्याख्येन आक्रान्त्रा भङ्त्वा विनाशितः। काश्मीरेष्वपि महाराजेन प्रबलपराक्रमिणा श्रीललितादित्यमुक्तापीडेन निर्मापितं मार्तण्डाख्यं विश्वविश्रुतं सूर्यमन्दिरमासीत् यस्य भग्नावशेषा 'मट्टन'-नाम्नि नगरे इदानीमपि द्रष्टुं शक्यन्ते। मुल्ताननगरे यवनैः देवालये ध्वस्ते विनाशिते च सति तत्रत्याः सूर्योपासकाः मुख्यतः उत्कलदेशमाययुः, तत्र च राज्ञा नरसिंहदेवेन निर्मापितस्य 'कोणार्क' इति नाम्ना ख्यातस्य आदित्यदेवालयस्य सविधे प्रवहन्तीं स्रोतस्विनीमपि 'चन्द्रभागा' इत्यभिधया अलञ्चक्रुः।।

हयशीर्षपाञ्चरात्रस्य रचनाकालः ईशवीयषष्ठशताब्दीतोऽष्टमशताब्दीपर्यन्तं

भवितुमर्हतीति प्रायः विदुषामस्माकं चापि मतम्। एष एव कालः सूर्योपासनाया उत्कर्षस्य। अस्य पाञ्चरात्रस्य काश्मीरप्रदेशेन घनिष्ठः संबन्धो ग्रन्थस्यान्तरिकप्रमाणैरेव संपुष्यते। अस्मत्सविधे प्रतिलिपिरूपेण विद्यमाने अद्यावध्यप्रकाशिते द्वितीये काण्डे वाग्देवताया उपासना- प्रसंगे ग्रन्थकारो निर्दिशति यत् कस्यचिन्नवीनस्य ग्रन्थस्य लेखनारम्भे कविः प्रतिलिपिकारो वा सर्वप्रथमं वाग्देवतां पूजयित्वा 'समशीर्षैः काश्मीराक्षरैर्नागराक्षरैर्वा पुस्तकं लिखेत्'। कीदृशानि अक्षराण्येतानि भवितुमर्हन्तीत्येदप्यत्र सूचितम्। उद्ध्रियते –

रौप्यपात्रे मसीं स्थाप्य लेखन्या हेमया शुचिः
काश्मीरैर्नागरैर्वर्णैः समशीर्षैः समांशकैः।
स्निग्धैर्नातिकृशैः स्थूलैः ह्रस्वदीर्घादिलक्षितैः
लेखयेल्लेखको धीमान् शब्दशास्त्रविशारदः॥[1]

असितमसीसाहाय्येन कर्गदोपरि टङ्कितानि काश्मीराक्षराणि प्रायोऽतीवस्थूलानि भवन्तीति शारदालिपिविदो जानन्त्येव। मसीशब्दस्योल्लेखेन, शारदाक्षराणां प्रधानतया चोल्लेखेन हयशीर्षपाञ्चरात्रस्य रचनाप्रदेशः पुनरपि काश्मीरदेश एव, इत्यनुमातुं शक्यते।

हयशीर्षपाञ्चरात्रं द्वादशशताब्दीपर्यन्तं बङ्गदेशे विद्यमानं नासीत्। अन्विष्यमाणा अपि तस्य मातृकाः न कुत्रापि प्राप्यन्ते स्म। तथापि श्रुतिपरम्परया तस्य महत्त्वस्य बोधो विदुषामासीत्, आसीच्च तेषां मध्येऽस्य भूयसी प्रतिष्ठा। बल्लालसेनाख्येन राज्ञा कुतश्चित्तस्यैका पाण्डुपिरासादिता या तु 'द्विखण्डा' लिपौ अङ्किता सती तत्रत्यानां पण्डितानामपठनीयाऽऽसीदिति षोडशशताब्द्यां लब्धजन्मा धर्मशास्त्रकारो रघुनन्दनः स्वकीये 'मठप्रतिष्ठातत्त्वा' ख्ये ग्रन्थे उल्लिखति। विदुषां मतं त्वेतद् यदेषा बंगेष्वपरिचिता लिपिः 'शारदा' आसीत्। प्राचीनेषु पाञ्चरात्रग्रन्थेषु केवलं हयशीर्षे एव भगवतो वासुदेवस्य 'पुरुषोत्तमा'ख्यस्वरूपस्य प्रतिष्ठाविधिर्वर्णितो वर्तते। विदितमेव विपश्चितां यदि 'पुरुषोत्तम'-रूपं उत्कलेषु पुरुषोत्तमाख्ये पुरी-नगरेऽवस्थितं भगवन्तं जगन्नाथं सूचयति। पुरुषोत्तमस्य प्रतिष्ठाविधिं विवर्णयिषुर्ग्रन्थकारः उपक्रमते -

अत ऊर्ध्वं प्रवक्ष्यामि प्रतिष्ठां तव सत्तम्।
पुरुषोत्तमरूपस्य वासुदेवस्य तां शृणु॥

हयशीर्षपाञ्चरात्रं पुरुषोत्तमस्य अष्टहस्तात्मकं, चतुर्हस्तात्मकं, द्विहस्तात्मकं चेति त्रिविधं स्वरूपं वर्णयति, किन्तु केवलं चतुर्हस्तात्मकस्य, द्विहस्तात्मकस्यैव प्रतिष्ठां वक्ष्यामीति तदनन्तरं प्रतिजानीते। चतुर्हस्तात्मके स्वरूपे दक्षिर्णोर्ध्वहस्ते अभयमुद्रा, वामोर्ध्वे चक्रम्, दक्षिणाधो हस्ते गदा, वामाधः शंखश्च। एतदेव स्वरूपं उत्कले सर्वत्र उपलभ्यमानस्य 'नीलमाधवा'ख्य विग्रहस्य। स्कन्दपुराणीयपुरुषोत्तममाहात्म्यानुसारं

1. ह. पा. २/३६, ३७

पुरुषोत्तमक्षेत्रे पुराकाले प्रथमं नीलमाधवस्यैव विग्रहः शबरैः पूजितोऽभूत्। तस्मिन् विग्रहे तिरोभूते सति इन्द्रद्युम्नेन विष्णोराज्ञया वर्तमानो दारुविग्रहः स्थापितः। द्विहस्तात्मकस्य पुरुषोत्तमस्य द्वेधा स्वरूपम्। प्रथमं तावद् दक्षिणे अभयमुद्रां, वामे च चक्रं धारयति, अथ च द्वितीयं दक्षिणे गदां शंखं वा, वामे तु चक्रं धारयति। प्रथमे स्वरूपे देव्यौ 'श्रीः' 'पुष्टिश्च' तस्य शक्तिरूपेण उभयतस्तिष्ठतः, द्वितीये लक्ष्मी, सरस्वती च। एतादृशि द्वितीये विग्रहे सुभद्रा, सीरपाणिर्बलभद्रश्च तस्य दक्षिणपार्श्वे तिष्ठतः इति हर्यशीर्षोक्तिः। हयशीर्षपाञ्चरात्रमेतत् स्वरूपं 'त्रैलोक्यमोहन' इत्यभिधत्ते। स्पष्टमेतद्यद् हयशीर्षमत्र श्रीजगन्नाथमन्दिरे रत्नवेद्यां विराजमानस्य पुरुषोत्तमस्यैव स्वरूपं वर्णयति। अग्रहस्ताभावाद् यद्यपि दारुविग्रहे पुरुषोत्तमे आयुधानि न सन्ति, तथापि तस्योभयोः हस्तयोः यथास्थानं शंखश्चक्रं च चित्रितं वर्तते, अथ च श्रीलिङ्गराजमन्दिरपरिसरे वर्तमाने एकस्मिन् प्राचीने पार्श्वमन्दिरे तत्र स्थितेषु त्रिष्वेव मणिमयविग्रहेषु एतान्येव हयशीर्षोक्तलक्षणानि दृश्यन्ते।

हयशीर्षे वर्णितं श्रीपुरुषोत्तमस्य 'त्रैलोक्यमोहना'ख्याभिधानमस्य पाञ्चरात्रस्य लक्ष्मणदेशिकवर्येण विरचितेन 'शारदातिलका'ख्यतन्त्रग्रन्थेन, काश्मीरिक-तन्त्रपरम्परया च साक्षात् संबन्धं संसूचयति। शारदातिलके भगवतो विष्णोः पुरुषोत्तमरूपस्य चत्वारो भेदाः-श्रीकरः, कृष्णः, कामः, त्रैलोक्यमोहन इति। अन्तिमे त्रैलोक्यमोहनाभिधे रामणीयकस्य प्रीतेश्च प्राधान्यम्। शारदातिलकं वर्णयति यदस्मिन् स्वरूपे लक्ष्मी पुरुषोत्तमस्य वामोरौ उपविष्टा, देवेन दृढमुपगूढा तदालिङ्गिता च तिष्ठति। अस्य स्वरूपस्य ध्यानमन्त्रस्तु औत्कलीयासु पुरुषोत्तम-पूजापद्धतिषु एवंप्रकारकः -

हस्तैर्बिभ्रत्सरसिजगदाशंखचक्राणि विद्यां,
पद्मादर्शौ कनकलशं मेघविद्युद्विलासम्।
वामोत्तुङ्गस्तनमविरलाकल्पमाश्लेषलोभाद्
एकीभूता तनुरवतु नः पुण्डरीकाक्षलक्ष्म्योः॥[1]

उमा-महेश्वरयोः विग्रहेणोपमितस्य तत्प्रेरितस्य चास्य पुण्डरीकाक्षलक्ष्म्योः स्वरूपं 'हयशीर्षे' 'शारदातिलके' चोभयनिष्ठम्, उभयत्रापि शब्दशः समानञ्च। शारदातिलककर्ता लक्ष्मणदेशिकेन्द्रः एकादशशताब्द्यां वर्तमानः काश्मीरिकस्तन्त्रशास्त्रज्ञः। अस्मिन् ग्रन्थे त्वरिताप्रकरणे, भैरवीप्रकरणे चोपास्यत्वेन वर्णितानां यासामनेकासां 'त्रिकण्टिका'-'वज्रप्रस्तारिणी'-'अश्वारूढा' दिमहायानीयानां वज्रयानीयानां वा बौद्धदेवीनामुल्लेखो वर्णनञ्च विद्यते न तदन्यत्र कुत्रापि विरचितेषु ग्रन्थेषु प्राप्यते। काश्मीरेषु बौद्धतन्त्रस्य शाक्तस्य, वैष्णवतन्त्रस्य च समकालिकी समुपस्थितिरासीत्।

अन्यश्चापि कश्चिद् 'दधिवामन' संज्ञको देवः शारदातिलके उपास्यत्वेन वर्ण्यते यस्य ध्यानं तु चन्द्रमण्डलमध्यवर्तिगौरवर्णबालकरूपेण क्रियते। देवस्यास्मिन् स्वरूपे

1. शारदातिलके ६/४४

विशदीक्रियते यत् स कुटिलालकावलीयुक्तो दक्षिणहस्ते दध्योदनपूर्णस्वर्णपात्रं ('चषकं), वामे च निर्मलजलपूर्णं कलशं धारयन्नास्ते –

मुक्तागौरं नवमणिलसद्भूषणं चन्द्रसंस्थं
भृङ्गाकारैरलकनिकरैः शोभि वक्त्रारविन्दम्।
हस्ताब्जाभ्यां कनककलशं शुद्धतोयाभिपूर्णं
दध्यन्नाढ्यं कनकचषकं धारयन्तं भजामः॥

उत्कलेषु एषा 'दधिवामन'-संज्ञा तु श्रीजगन्नाथस्य, तस्य खर्वाकृतेर्बिम्बस्य कृते प्रयुज्यते यत्र सुभद्राबलभद्रविरहिता एकाकिन्येव दारुप्रतिमा गर्भगृहे वर्तते। यदत्र ऑक्सफोर्ड विश्वविद्यालयीयाचार्य सैण्डर्सनादिवत् केचन विद्वांसो 'दधिवामन' इत्यभिधेयस्य उत्कलेऽद्यापि प्रयुज्यमानत्वेन शारदातिलकस्य उत्कलोद्गमत्वं साधयितुं प्रयतन्ते, तदसमीचीनम्। शारदातिलके वर्णितो दधिवामनः कृष्णेन किंचित् साम्यं बिभ्रदपि अन्यैव कापि देवता, न तु जगन्नाथः। कदाचिद् उत्कले यदि शारदातिलकस्य रचना अभविष्यत् तदा एतद्ग्रन्थकारो दधिवामनस्य स्वरूपं न तथा अवर्णयिष्यद् यथा इदानीं ग्रन्थे वर्तते, अपितु अग्रहस्तपादादिविहीनकृष्णवर्णपुरुषवत्। वस्तुतः औत्कलैः केवलं 'दधिवामन' इत्यभिधानं शारदातिलकाद् गृहीतम्, तच्च श्रीपुरुषोत्तमस्य वामनाकृतेर्विग्रहस्य कृते च प्रयुक्तम्, न तु तैः शारदातिलके वर्णितस्य देवस्य स्वरूपं गृहीतम्।

शारदातिलकस्याधोनिर्दिष्टं मङ्गलाचरणपद्यं वाक्तत्त्वस्य महत्त्वं प्रतिपादयन् विवृणोति यज्जगदिदं वस्तुतः शब्दार्थरूपं, यत्पुनरव्यक्तरूपस्य परमशिवाख्यचैतन्यस्य व्यक्तं रूपान्तरम् –

नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमाद्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत्।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कसदनं वाचामधीशं महः॥

अयमाशयः। सूक्ष्मातिसूक्ष्मो नित्यानन्दस्वरूपः परमशिवाख्यनिष्कलश्चैतन्यः स्वेनैवोत्सृष्टया स्वकीयया शक्त्याः वाचा संगतः, सकलः संजातो नादं जनयति (सच्चिदानन्दरूपात् सकलात् परमेश्वरात्, आसीत् शक्तिस्ततो नादो नादाद् बिन्दुसमुखवः, शा० ति० १/७)। एष नादो मातृकागणमुत्पाद्य तेन शब्दार्थमयस्यैतस्य जागतिकप्रपञ्चस्याद्धिलं वस्तुजातं महाभूतयोगात् पृथक् पृथगुत्पादयति। एवमेतज्जगतः पदार्थानां वाचकः शब्दः, अर्थस्तु तद्वस्त्वेव द्रव्यं वा, विचारो वा। इदं पद्यं काश्मीरिक-शैवदर्शनस्य सारतत्त्वमतीवमनोरमतया आविष्करोति। भूतशुद्धौ ललाटचन्द्रात् स्रवन्त्या मातृकामय्या

1. शा० ति० १५/५८

अमृतधारया एव देहस्य पुनर्निर्माणं भवति। अन्तर्गतं हि चैतन्यं परमशिवात्मकम्, तदेव वाचामधीशं परमं तेजः, नित्यानन्दमयं च। वाक्यपदीयकारः काश्मीरिको भर्तृहरिरपि वाक्तत्त्वम् अनादिनिधनात्मकाक्षरब्रह्मरूपेणोपस्थाप्य दृश्यमानं जगत्तस्य विवर्तरूपेण स्वीकरोति 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।'[1] सैव परम्परा अत्रापि। 'शारदातिलकस्य' औत्कलीयाक्षरेषु अङ्किता यावत्यः पाण्डुलिपयः उत्कलेषूपलभ्यन्ते न तावत्योऽन्यत्र कुत्रापि भारते। पण्डितानां प्रायो गृहे गृहे एतद्ग्रन्थरत्नं तिष्ठति। सर्वस्यामौत्कलीयतन्त्रशास्त्रपरम्परायां, दीक्षार्चनादिविविधविधासु, अस्य भूयान् प्रभावः सुस्पष्टतया परिलक्ष्यते। न केवलं शाक्तसंप्रदायान्तर्गतेषु अपितु शैवमतप्रतिपादकेषु, अथ च वैष्णवमतानुवर्तिषु ग्रन्थेष्वपि शारदातिलकस्य श्लोकाः प्राचुर्येण उद्ध्रियन्ते। श्रीलक्ष्मीधरमिश्रकृते 'शैवकल्पद्रुमा' ख्यग्रन्थेऽपि (१६७५ ई०) शारदातिलकस्योपजीव्यत्वं निःसन्दिग्धम्।

पुरीनगरे वर्षद्वयं वसखिरस्माभिरेकदा पुरुषोत्तमस्य दैनन्दिनपूजार्चनादिविधिविषये अर्चकेभ्यो विजिज्ञासितम्। तैरुक्तं यद् अद्यत्वे यां पूजापद्धतिं सर्वे अर्चका अनुसरन्ति सा तु उत्कलाधिपतिना महाराजेन गजपतिपुरुषोत्तमदेवेन पञ्चदशशताब्द्याः उत्तरार्द्धे विरचिता विरचायिता वा आगमविधिः। ''गोपालार्चनविधि'र्नामकोऽयं ग्रन्थः काश्मीरिककेशवभट्टेन विरचितां कृष्णार्चनविषयिणी 'क्रमदीपिका' 'इति नाम्नीं रचनामामूलम् आऽऽन्तं च साक्षात् निरवच्छिन्नं दृढं चानुसरति। 'क्रमदीपिकायाः' मूलस्रोतस्तु पुनः शारदातिलकम्।

क्रमदीपिकायाः रचनाकारः 'काश्मीरिकः' केशवभट्टो निम्बार्कमतानुयायी आसीत् यस्तु काश्मीरेभ्य आगत्य ईशवीयचतुर्दश-शताब्द्यां वृन्दावने वनमालिनो वरिवस्यायां कालं यापयन् तत्रैव न्यवसत्, बादरायणीय ब्रह्मसूत्रेषु निम्बार्कमतानुसारिणी 'कौस्तुभ'-नाम्नीं टीकां च व्यरचयत। अन्येभ्यः 'केशव' नामधारिभ्यो व्यपोहनार्थं स्वकीयेन नाम्ना संयुक्तं तेन 'काश्मीरिक' इति। यद्यपि काश्मीरदेशोद्भवानां पण्डितानां कृते 'भट्ट'-शब्दः सामान्येन प्रयुज्यते, एतदुपाह्वसंवलितानि अनेकानि अभिधेयानि तत्रत्यानां विदुषां ख्यातानि (केचन धर्मान्तरिता यवना इदानीमपि 'बट्' इत्युपनाम धारयन्ति, इति तु नाविदितमुदन्तपत्रपाठकानां दूरदर्शनाद्यवलोकनपराणाम् !) किन्तु न वयं नैश्चित्येन जानीमो यदयं मूलतः काश्मीराभिजन आसीत्, उताहो अन्यतः कुतश्चिद् आगत्य, काश्मीरेषु तन्त्रशास्त्रमधीत्य, तदनन्तरं च वृन्दावनं गत्वा तत्र अर्चनप्रवचनलेखनादिभिः कालं नयन् सुचिरं सुखं च न्युवास। सप्तदशशताब्दीकेन सुप्रसिद्धेन भाषाकविना श्रीनाभादासेन स्वकीये व्रजभाषायां विरचिते ''भक्तमाल'' नाम्नि काव्यग्रन्थे अनेकेषां विष्णुभक्तानां चरितमुपनिबद्धम्। तत्र 'काश्मीरिक'-केशवभट्ट-विषये स कथयति –

1. वा० प० २/१)।

काश्मीर की छाप पाय सकले जगमण्डन।
दृढ़ हरिभक्ति कुठार आन-मत विटप विखण्डन।। ३३०/७५
('छाप' इति भाषाशब्दस्यार्थः 'मुद्रणम्' 'अङ्कनम्' वा ।)

"स्वकीये वैदुष्ये काश्मीरदेशस्य अंकनं प्राप्य केशवभट्टो जगन्मण्डनं, जगद्भूषणं वा समजायत। हरिभक्तिरूपिणा कुठारेण स विटपरूपिणामन्येषां प्रतिवादिमतानां खण्डनमकरोत्'' इत्याशयोऽस्य पद्यस्य। एतदेव संपोषयन् नाभादासः पद्येऽस्मिन्नग्रे वर्णयति यत् स एकदा कस्मिंश्चिद्धार्मिकवादे, शास्त्रार्थे वा मथुरानगरस्य अज़ीमनामानं 'काज़ी'मपि विजितवान् (काज़ी=धार्मिक न्यायाध्यक्षः)। तद्यथा-'काज़ी अजिम समेत देखि परचे भयभीते, विदित बात संसार सब, सन्त साँहि नाहिन दुरी। श्री केशवभट्ट-नरमुकुट-मणि, जिनकी प्रभुता विस्तरी')।

'काश्मीरिकस्य' केशवभट्टस्य जन्मभूमिः काश्मीराः अन्यो वा कश्चित् प्रदेशो भवेत्, किन्तु एतत्तु निश्चप्रचं यत् स काश्मीरिकविद्वत्परम्पराया एव प्रसूतिः, तामेव सर्वतोभावेन आत्मसात् कृत्वा स क्रमदीपिकायाः रचनामकरोद् इति निःसंशयम्। काश्मीरिकवैष्णवपरम्परायां कृष्णेन सह राधाया उपासनं नैव प्रचलितं यथा वृन्दावने सर्वत्र दरीदृश्यते। एतस्य प्रातिलोम्ये वृन्दावने विरचितायां क्रमदीपिकायां राधाया नामोल्लेखोऽपि नास्ति। अत्र कृष्णस्य रुक्मिण्यादयः प्रमुखा अष्टमहिष्य एव कृष्णोपासनायां विहिते अष्टदलपद्मे एकैकस्मिन् दले आहूता सत्यः पूजनं लभन्ते। एवमेव देवालये पुरुषोत्तमजगन्नाथस्यार्चनायामपि।

वस्तुतः पुरुषोत्तमस्य पूजापद्धतयोऽक्षरशः 'क्रमदीपिका'मनुसरन्ति, तत्र निर्दिष्टा एव मन्त्राः, न्यासाः, ध्यानश्लोकाश्च सर्वत्र प्रयुज्यन्ते।

'क्रमदीपिकाया एव सरलं रूपान्तरं गौडदेशोद्भवम् एकत्रिंशदध्यायात्मकं 'गौतमीय-तन्त्रम्', यत् तु वाराणसीतः प्रकाशितं सत् सारल्येनोपलभ्यते, सर्वजनसुलभं चास्ति। 'शारदातिलकं' 'हयशीर्षपाञ्चरात्रं' 'गौतमीयतन्त्रं' चावेक्ष्य, एतत्त्रयमुपजीव्यत्वेन कल्पयित्वा, पण्डितवर्येण उत्कलाभिजनेन 'श्रीगोविन्दकविभूषण-सामन्तरायेण' कृष्णार्चनपद्धतेः कश्चिदभूतपूर्वोऽतीवरमणीयः, अद्वितीयपाण्डित्यपूर्णश्च 'सूरिसर्वस्व' नामा ग्रन्थोऽष्टादशशताब्द्यां निरमायि यथा ग्रन्थान्ते प्राप्यमाणेन पद्येनैकेन ('ख-शून्य-मुनि-चन्द्रमःप्रमितशाकसंवत्सरे, गते व्यरचि मे बुधाः' ... इत्यनेन) ज्ञायते। एष ग्रन्थस्तु ओडिशाराज्यसंग्रहालयपक्षतः प्रकाशितः सारल्येनोपलभ्यते। ग्रन्थारम्भे स्वकीयग्रन्थस्य मूलस्रोतांसि प्रति आधमर्ण्यं प्रकाशयन् स कथयति-

श्री शारदातिलक-तान्त्रिकगौतमीय-
श्रीपाञ्चरात्र-हयशीर्षमवेक्ष्य बुद्ध्या ।

सिद्धा हि सिद्धिमतुलां च यया पुरग्रे
तां कर्मयोगपदवीमविशिष्य वक्ष्ये ॥

काश्मीरप्रदेशे विरचिताः विविधा आगमग्रन्थाः उत्कलेषु प्रसिद्धाः प्रचलिताश्चासन्, विद्वद्भिरधीयन्ते स्म चापि सोत्साहं साग्रहम्। एतस्य नूतनं प्रमाणं कतिचिद् वर्षाणां प्राक् 'आंगिरसकल्प' इति नाम्नि ग्रन्थे दृष्टिपथमागतम्। अर्थर्ववेदीया 'पैप्पलादशाखा' अद्यत्वेऽपि केवलं, उत्कलेषु यत्र तत्र कथंचिद् जीवति इति विदन्ति प्रायो वेदविदः। अस्या एव शाखाया मन्त्रा अथर्ववेदीयब्राह्मणानां विवाहव्रतबन्धादिसंस्कारेषु प्रयुज्यन्ते। उदात्तादिस्वरचिह्नविरहिता ताडपत्रेषु उत्कीर्णा मातृकाश्चाप्येतस्याः संहितायाः तस्मिन् देशे यत्र तत्र सुलभाः। आंगिरसकल्पः बालेश्वरनिवासिभिः श्रीउमाकान्तपण्डामहाभागैः पुस्तकाय 'वशीकरणादिषट्कर्मपद्धतिः' इति विचित्रं शीर्षकं दत्त्वा प्रकाशितः। मोहन–वशीकरणोच्चाटनादिकर्मणां मन्त्रक्रियादिकं व्याख्याय आंगिरसकल्पकर्ता निर्दिशति यदेतानि पुण्यक्षयकारीणि हीनकर्माणि, नैव अनावश्यकं पण्डितवर्यैः प्रयोज्यानि। मोक्षस्य अभिलाषश्चेद् विपश्चिद्भिः 'परात्रीशिकायां' विस्तरेणोपपादितं 'सौः' इत्येकाक्षरेण मन्त्रेण पराशक्तेरुपासनं कर्त्तव्यम्। जानन्त्येव सर्वविधदर्शनसिद्धान्तनिष्णाता विद्वांसो यत् 'परात्रीशिका' काश्मीरागमस्य अतीवरहस्यमयो गूढश्च ग्रन्थः यस्तु श्रीमता अभिनवगुप्तपादाचार्येण 'विवरणम्' इतिनाम्न्या टीकया समुद्घाटितः!

कथमुत्कलदेशस्य गौडदेशस्य च काश्मीरप्रदेशेन सह आगमादिपरम्परायामेतादृशः सम्बन्धः संबभूव इति विचार्यमाणे सति स्पष्टं भवति यदेतन्मुख्यत्वेन काश्मीराधिपतेर्महाराजस्य ललितादित्यमुक्तापीडस्य गौडादिदेशेषु विजययात्रायाः प्रभावः। कल्हणेन रचितायाः राजतरंगिणीतः स्पष्टं यत् चतुस्त्रिंशदधिकसप्तशते (७३४ ई.) ईशवीये वर्षे महाप्रतापी ललितादित्यः पञ्चनददेशं विजत्य, कान्यकुब्जाधिपं यशोवर्माणं च पराजित्य, गौडदेशमागतः तत्रस्थं जीवगुप्तनामानं राजानं परास्य स उत्कलदेशं विजिग्ये। तदनन्तरं पश्चिमां दिशं प्रतिष्ठमानः मालवदेशं, गुर्जरदेशं, कर्णाटकस्य उत्तरभागं विजित्य स काश्मीरान् प्रति निववृते। य एव देशस्तेन विजितः, प्रायः तस्य विद्वांसोऽनेन स्वेन साकं स्वदेशं नीताः। अभिनवगुप्तस्य पूर्वजा अपि एवमेव कान्यकुब्जप्रदेशात् काश्मीरान् प्राप्ताः। 'अत्रिगुप्त' नामा तस्य वृद्धप्रपितामहोऽपि ललितादित्येन सादरमामन्त्रितः सन् काश्मीरेष्वेव सुखमुवास।

ललितादित्यस्य विजययात्रानन्तरम् उत्तरभारतस्य काश्मीरप्रदेशेन सह संबन्धः सुतरां द्रढीयान् समजायत। एतावत्सु विद्वत्सु तत्र स्थितेषु मध्यदेशात्, मगधाद्, बंगदेशाद्, उत्कलदेशाच्च बहवश्छात्राः अध्ययनार्थं काश्मीरान् प्राप्ताः। तत्राधीयानानां गौडदेशीयच्छात्राणां जीवनचर्यायाः यदतीवरोचकं चित्रणं महाकविना क्षेमेन्द्रेण स्वीये 'देशोपदेशः' नाम्नि ग्रन्थे कृतं तद् विद्वद्भिर्निभालनीयं विद्यते। तात्कालिको

गौदेशस्तु 'पाल'-संज्ञकभूपतिभिः पालित एतत्कालिको बिहार-बंगालोत्कलभूमिभागः। संस्कृतसाहित्यस्य उत्कृष्टतमोऽयं व्यंग्यकारः क्षेमेन्द्रः कथयति 'यदेते गौडदेशीयाश्छात्राः यदा काश्मीरान् आगच्छन्ति तदा ते मानवकरङ्कवद् अस्थिमात्रावशेषा दृश्यन्ते किन्तु कञ्चित् कालं काश्मीरेषूषित्वा, अस्य देशस्य पौष्टिकमन्नं फलादिकं च भुक्त्वा, पौरोहित्येन प्रचुरं धनं चार्जयित्वा, ते काश्मीरदेशस्य मनोहरा रमणीः अनुधावन्ति, कामयन्ते च ताश्च। केचित्तु-(शान्तं पापम् !) - गणिकागारानपि प्रविश्य तत्र मोदन्ते (द्रष्टव्यम्-'देशोपदेशस्य' 'छात्रवर्णनम्' नाम षष्ठ उपदेशः)।

अधिसंख्याकाः स्नातकास्तु सश्रमं सोत्साहञ्च गुरुकुलेषु शास्त्रादिकमधीत्य स्वगृहान् प्रति निवर्तमानाः सन्तः प्रायः गुरुकुलेषु अधीतान् शारदाक्षरेषु लिखितान् एतान् ग्रन्थान् सहैव निन्युः। अथवा तैस्तत्रैव निवसद्भिः ग्रन्थानां प्रतिलिपीकरणं स्वसौविध्यार्थं स्वकीयदेशेषु प्रचलितासु लिपिसु कृतं, तदनन्तरं च स्वदेशनिवृत्तिसमये एते ग्रन्थाः सहैव नीताः। अनेन प्रकारेण काश्मीरोद्भूततान्त्रिकसिद्धान्तानां सर्वत्र गौडदेशे प्रचारः संबभूव। दर्शनशास्त्रे बद्धरुचयो दाक्षिणात्याः काश्मीरिकशिवाद्वैतदर्शनं तत्राधीत्य तत्संबन्धिनो ग्रन्थान् केरलादिदेशेषु नीतवन्तः येन मलयालमाक्षरेषु ताडपत्रेषु उट्टङ्किताः उत्पलदेवविरचिता 'ईश्वरप्रत्यभिज्ञाकारिके'त्यादयो ग्रन्थाः शुद्धतररूपेण तत्र प्राप्यन्ते। एवमेव काश्मीरोद्भवानां पाञ्चरात्रीयसात्त्वतेश्वरपारमेश्वरादिप्रमुखसंहितानां दक्षिणावर्ते प्रचारः समभूत्। अनेनैव कारणेन तत्रत्ये शैवागमे काश्मीरिकशैवागमस्य (शिवाद्वैतमतस्य, प्रत्यभिज्ञाशास्त्रस्य च) भूयान् प्रभावः परिलक्ष्यते। 'ईश्वरप्रत्यभिज्ञाकारिका' प्रभृति विविधदार्शनिकग्रन्थानां शुद्धतराः टीकाग्रन्था अपि केरलादिदेशेषु सुलभा नान्यत्र, इत्यपि तत्रत्यानां विदुषां, तेषां पूर्वजानां वा, काश्मीरिकगुरूणामन्तेवासित्वं, तैः सह परिचयं संपर्कसातत्यं च प्रमाणयति।

एतदेव कारणं 'हयशीर्ष'-'शारदातिलका'दिग्रन्थानां उत्कले बहुत्र उपस्थितेः, तेषाम् औत्कलीये कर्मकाण्डे ज्ञानकाण्डे च प्रभावस्य, इति शम्।

***

सन्दर्भग्रन्थाः

1. क्रमदीपिका-काश्मीरिककेशवभट्टविरचिता, गोविन्दभट्टाचार्यकृतसंवलिता। चौखम्बा संस्कृत सीरीज़, सं० २३३, २३६, २५४, वाराणसी १९१७, सुधाकरमालवीयकृत हिन्दी अनुवादसहिता, तत एव प्रकाशिता १९८९;
2. गौतमीयतन्त्रम्-सं० वामनशास्त्री शर्मा, करनाटक प्रेस, मुम्बई १८८९; सं० भगीरथा, चौखम्बा वाराणसी १९७७, सं० रामजी मालवीय, सं० संस्कृतविश्वविद्यालयः, वाराणसी १९९२;

3. नैषधीयचरितम्-श्यामलेशकुमारत्रिपाठीकृत भाषानुवादोपेतम्, चौखम्बा सुरभारती, वाराणसी २०१७ (नारायणकृतसंस्कृत-टीकया सार्द्धं बहुत्र प्रकाशितम्);

4. परात्रीशिका, विवरणसहिता, ठाकुरजयदेवसिंहकृत आंग्लानुवादसहित, मोतीलाल बनारसीदास, दिल्ली;

5. पैप्पलादसंहिता-देवनागरी संस्करण, शारदा एवं उड़िया पाण्डुलिपियों के आधार पर श्री व्रजमोहन भट्टाचार्य एवं दीपक चट्टोपाध्याय द्वारा संपादित, ४ भाग, एशियाटिक सोसायटी, बंगाल, कोलकाता, २०१७ (पूर्व में भी डॉ० रघुबीर द्वारा केवल काश्मीरी शारदा पाण्डुलिपि के आधार पर लाहौर से प्रकाशित);

6. भक्तमाल (व्रजभाषया ग्रथितं)-नाभादास विरचित, खेमराज-श्रीकृष्णदास-वेंकटेश्वर प्रेस, मुम्बई, प्रकाशनवर्षं नैव सूचितम्

7. लक्ष्मीतन्त्रम्-संजुक्तागुप्ताकृत आंग्लानुवाद सहित, पुनर्मुद्रण, मोतीलाल बनारसीदास, दिल्ली २०१७;

8. शारदातिलकम् (लक्ष्मणदेशिकविरचितम्) - राघवभट्टकृत-पदार्थादर्शाख्यटीकया संवलितम्, श्रीखण्डेलवालकृत भाषानुवादोपेतम्। चौखम्बा ओरियन्टालिया वाराणसी २०१४, सुधाकरमालवीयकृत भाषानुवाद-संवलितम् पदार्थादर्शोपेतञ्च, चौखम्बा संस्कृतप्रतिष्ठान, वाराणसी २००७;

9. सूरिसर्वस्व-गोविन्दकविभूषण सामन्तराय विरचित, १-४०, अध्याय, २ भाग, ओडिशा राज्य संग्रहालय, भुवनेश्वर १९७४, १९९६;

10. हयशीर्षपाञ्चरात्र (अद्यावधि केवल प्रथम प्रतिष्ठाकाण्ड प्रकाशित, शेष ३ काण्ड प्रकाशनाधीन) - प्रथम आदि या प्रतिष्ठाकाण्ड, काली कुमार दत्त एवं कल्याण कुमार दास द्वारा सम्पादित, एशियाटिक सोसायटी, कोलकाता १९७६ (पूर्णग्रन्थ वर्तमान लेखक के संपादकत्व में इन्दिरा गाँधी राष्ट्रीय कला केन्द्र, दिल्ली से प्रकाशनाधीन)।

11. Otto Schrader : Introduction to Pñcartra and the Ahirbudhnya Samhita, Adyar Library, Madras (Chennai).

UGC- CARE Listed
जुलाई-सितम्बर, 2020

शोधप्रभा
वर्ष : 45, तृतीयोऽङ्कः

करणत्वविचारः

डॉ. चक्रपाणिपोखे्रलः *

वैयाकरणैः तृतीयाविभक्तिरनुक्ते कर्तरि करणे च विधीयते। तत्र तृतीयाविभक्ति-विधायकं सूत्रमस्ति **"कर्तृकरणयोस्तृतीया"**[1] एषा च तृतीयाविभक्तिः द्विविधा भवति कर्तृतृतीया करणतृतीया चेति। 'आश्रयोऽवधिरुद्देश्यः' इत्यादिना कर्तुराश्रयोऽर्थो ध्येयः। एवञ्च यथा उक्तकर्तुः आश्रयोऽर्थस्तथैव अनुक्तकर्तुरपि आश्रय एवार्थः। तथा चोक्तं कौण्डभट्टेन यथा-

"द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः" इति।[2] इत्थञ्च कर्तरि विधीयमाना या तृतीया तस्याः कर्तृत्वमेवाऽर्थो युक्तो भवति। कर्तृत्वञ्च 'प्रधानधात्वर्थव्यापाराश्रयत्वम्'। एवञ्चात्र व्यापारस्य धातुलभ्यत्वाद् 'अनन्यलभ्यो हि शब्दार्थः' इति रीत्या आश्रयत्वमेव कर्तृतृतीयार्थ इति फलति।

आश्रयत्वं तृतीयार्थ इति स्वीकारे प्रकृत्यर्थस्याभेदसम्बन्धेन आश्रयत्वस्य च निष्ठत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वयः। एवञ्च हरिः सेव्यते इत्यादौ आख्यातार्थोऽप्याश्रयः **"फलव्यापारयोः धातुराश्रये तु तिङः स्मृतः"**[3] इत्युक्तेः। 'हरिः सेव्यते' इत्यत्र फले हरेरभेदेन, तिङर्थभूतस्याश्रयस्य फले वृत्तित्वसम्बन्धेन, फलस्य चानुकूलत्वसम्बन्धेन व्यापारेऽन्वयः। तथा च मदभिन्नाश्रयनिष्ठहर्यभिन्नाश्रयवृत्तिसेवनानुकूलो व्यापार इति प्राचां मते बोधो भवति। तथैव कर्मणि प्रत्यये फलमुख्यविशेष्यकशाब्दबोधस्वीकर्तृणां नव्यानां मते तु मदभिन्नाश्रयनिष्ठव्यापारजन्यहर्यभिन्नाश्रयवृत्तिः सेवेति शाब्दबोधो भवति। इत्थं कर्तृतृतीयाया आश्रयार्थे स्वीकृते करणतृतीयाया अर्थः कः? इति शंका जागर्ति। तत्र करणतृतीयाया अर्थज्ञानार्थं प्रथमं करणस्य अर्थज्ञानवमाश्यकं भवति। करणत्वस्य लक्षणं यथा नागेशेन **"स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम्"**[4] इति। इदमेव साधकतमत्वमिति पदेन नागेशः स्वमतस्य सूत्रकारेण सह संगतिं प्रदर्शयति। तत्र करणविषये

* अतिथि-अध्यापकः, संस्कृत-विभागः, ओडिशाकेन्द्रीयविश्वविद्यालयः, कोरापुटः, ओडिशा।

1. पा.सू. १/४/४६
2. वैयाकरणभूषणसारः, सुबर्थनिर्णयः पृ.सं.१६९
3. वैयाकरणभूषणसारः, धात्वर्थप्रकरणम् का.सं.१
4. प.ल.म.का.नि. १७२

सूत्रकारस्य मतं यथा **"साधकतमं करणम्"**[1] अस्य सूत्रस्य व्याख्यानं वैयाकरणैरेवं कृतं "क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्" इत्यस्याः वृत्तेरयं भावः। "यद्यपि क्रियासिद्धौ सर्वेषां कारकाणां साधकत्वं किन्तु यस्यातिशयेनोपकारकत्वं विवक्षते तत् तदा करणम्।" अत्रातिशयेनोपकारकत्वञ्च यथा हर्युक्तम्–

क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम्।
विवक्षते यदा यत्र करणं तत्तदा स्मृतम्।।[2] **इति।।**

यथा 'रामेण बाणेन हतो बाली' इत्यत्र बाणः क्रियायाः परिनिष्पत्तौ कर्तुः व्यापारादनन्तरमतिशयेनोपकारको भवति इति तस्य साधकतमत्वात् करणसंज्ञा भवति। अत्र हि रामं विना बालिनं विना अपि हननक्रियायाः सिद्धिर्न भविष्यति। अत उभयोः करणत्वं साधकत्वं वा हननक्रियासिद्धौ किन्तु बाणस्य बालिसंयोगानुकूलो यो व्यापारः तदनन्तरमेव हननक्रियायाः सिद्धिर्भवति। अतो बाणस्य प्रकृष्टोपकारकत्वात् करणसंज्ञा भवति न तु रामस्य। एवञ्च यद्व्यापारादनन्तरं तत्करणमिति सिद्ध्यति। यद्व्यापारादनन्तरं क्रियासिद्धिः तत्पदार्थमेव करणमिति पाणिनिमतं न तु द्रव्यमात्रं करणमिति। अत एव पाणिनिनोक्तम् **"करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य" इति।**[3] अस्य सूत्रस्यार्थस्तु यथा "अद्रव्यवाचकेभ्य एतेभ्यः शब्देभ्यः करणे तृतीयापञ्चम्यौ भवतः।" इति एवञ्च द्रव्यातिरिक्तानामपि करणत्वं स्वीकृतं पाणिनिना। करणस्य स्वरूपविषये भर्तृहरिणा स्वस्य वाक्यपदीयग्रन्थे इत्थं प्रतिपादितमस्ति। यथा–

क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम्।
विवक्षते यदा तत्र करणं तत्तदा स्मृतम्।।
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः।।[4] इति।।

अत्र क्रियाया इत्यस्य फलात्मिकाया इति नागेशेनार्थो विहितो वर्तते। क्रियते या सा इति व्युत्पत्त्या फलात्मिकायाः क्रियाया इत्यर्थलाभो भवति। साध्यत्वेन प्रतीयमानत्वाच्च धात्वर्थफलस्य क्रियात्वेन व्यवहारो भवति। रामेण बाणेन हतो बाली इत्यत्र कीदृशः शाब्दबोधो भवतीति नागेशेन प्रतिपादितं यथा– रामेण बाणेन हतो बाली इत्यादौ धनुराकर्षणादेर्व्यापारस्य बाणव्यापारात्पूर्वमपि कर्तरि सत्त्वात् रामाभिन्नकर्तृनिष्ठव्यापारप्रयोज्यो बाणनिष्ठो व्यापारः तज्जन्यं यत्प्राणवियोगरूपं फलं तदाश्रयो बाली इति बोधो भवतीति। एवमेव रामो बाणेन बालिनं हन्ति इत्यत्र कर्तृप्रत्यये बाणव्यापारजन्यो यो बालिनिष्ठप्राणवियोगस्तदनुकूलो रामकर्तृको व्यापार इति बोधो भवति।

1. पा.सू.१/४/४२
2. वाक्यपदीयम्, पदकाण्डम्, साधनसमुद्देशः ९०
3. पा.सू.२/३/३३
4. वाक्यपदीयम्, पदकाण्डम्, साधनसमुद्देश का. सं. ९०-९१

अत्र नागेशाशयः- शाब्दे तु कर्तृनिष्ठव्यापारस्य प्रयोज्यत्वसम्बन्धेन प्राणवियोगरूपे फल एवान्वयो भवति। समानशब्दोपात्तत्वप्रत्यासत्त्या फलव्यापारयोस्तथाऽन्वयस्यैव क्लृप्तत्वात्। रामाभिन्नकर्तृनिष्ठव्यापारप्रयोज्यो बाणाभिन्नकरणवृत्तिव्यापारजन्यश्च यः प्राणवियोगः तदाश्रयो बाली इति बोधस्यैव शाब्दत्वमिति ध्येयाद्। एतत्सर्वं ख्यापयन् नागेशो वक्ति यथा-

"अर्थाद्रामप्रयोज्यो बाणव्यापार इति पार्ष्णिको बोध इति।"[1]

नागेशस्यैतत्कथनेन तुल्यन्यायाद् अनुपदोक्तकर्मकृदन्तस्थलेष्वपि रामव्यापार-प्रयोज्यत्वस्य बाणव्यापारे पार्ष्णिकत्वमेव युक्तं भवतीति ध्वनितं भवति। सूत्रे प्रकर्षवाचक-तमब्ग्रहणेन लक्षणे "स्वनिष्ठव्यापाराव्यवधानेनेति" पदस्य लाभो भवति। ततश्च कर्त्रादिपञ्चकारकाणां करणत्वस्य वारणं भवति। तत्र सर्वेषां कारकाणां फलनिष्पादकत्वं तुल्यमेवास्तीति हेतोः। तथा हि साधकतममिति सूत्रे तमबर्थः प्रकर्षः, स च अव्यवधानेन फलजनकव्यापारत्ता।

अत्रैषा शंका जागर्ति यत्- करणे या अतिशयेनोपकारकत्वविवक्षा सा कारकान्तरापेक्षया करणान्तरापेक्षया वा? यदि काराकान्तरापेक्षया विवक्षा, तदैकाधिक-करणकारकाणि स्युः, यदि तु करणान्तरापेक्षया विवक्षा तदा युगपदेकस्यैव करणत्वं स्यादिति। अस्यां शंकायामेवं वक्तुं शक्यते यत् प्रकर्षश्चात्र कारकान्तरापेक्ष एव, न तु करणान्तरापेक्षोऽपि, कारकसामान्यवाचिसाधकशब्दादुत्पन्नेन तमपा करणेतरकारकावधिकप्रकर्षस्यैव द्योतनात्। तस्मात् देवदत्तो रथेन दीपिकया राजमार्गेण व्रजतीति युगपदनेकरणसमावेशः सिद्धो भवति। अन्यथा करणान्तरापेक्षस्यापि प्रकर्षस्य ग्रहणे तु युगपदेकस्यैव कस्यचित् करणं स्यात्, एकस्यैव कस्यचित्प्रकृष्टत्वादिति बोध्यम्। अत्र सर्वेषां कारकाणां फलनिष्पादकत्वस्य युक्तत्वात् तेषां करणत्वं न स्यादिति करणत्वावारणाय प्रकर्षतमत्वस्य आवश्यकता भवति।

करणविषये अग्निपुराणेऽपि प्रतिपादितमस्ति। यथा करणं द्विविधम्- १.बाह्यम्, २.आभ्यतरञ्च।

'चक्षुषा रूपं गृह्णाति बाह्यं दात्रेण तल्लुनेत्'[2] तत्र दात्रं छेदनक्रियायां बाह्यकरणं भवति। चक्षुस्तु रूपग्राह्ये रूपे कार्ये आभ्यन्तरकरणञ्च भवति। अपि च अग्निपुराणे तृतीयाविभक्तेः कतिपयान्युदाहरणानि दृश्यन्ते। यथा-

१. 'अनेन वसेत्' अत्र **हेतौ** इति सूत्रेण निवासस्य हेतौ तृतीयाविभक्तिर्भवति।
२. पृथक् विहारेण, विना श्रिया अत्र 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' इति पाणिनिसूत्रेण पृथगादियोगे तृतीया भवति।
३. "पिता पुत्रेण सहागतः" अत्र "सहयुक्तेऽप्रधाने" इति सूत्रेण सहशब्दस्य योगे तृतीया भवति।
४. 'अक्ष्णा काणः' 'गदया हरिः' अत्र "इत्थंभूतलक्षणे" इति सूत्रेण तृतीया भवति।

1. परमलघुमञ्जूषा, कारकार्थनिरूपणम् पृ.सं.१७३
2. अग्निपुराणम् ३५४/८.१

इत्थं कर्तृकरणयोस्तृतीया इत्यादिसूत्रसमूहैः विधीयमानायाः तृतीयाविभक्तेः कर्तृतृतीयादिशा आश्रयोऽर्थः। करणतृतीयादृष्ट्या च आश्रयो व्यापारश्चार्थ इति फलति। करणञ्चेदं विवक्षाधीनमेव, न तु गोत्वादिवद् वस्तुविशेषे व्यवस्थितम्। अत एव स्थाल्यां पचतीत्यत्र अधिकरणत्वेन निश्चिता अपि स्थाली, झटिति तप्तत्वेन स्वव्यापाराव्यवहितोत्तरपाक-निष्पादकतया विवक्ष्यते चेत्तदा तस्या अपि करणत्वमिष्टमेव, तदा स्थाल्या पच्यते इति प्रयोगः साधुरेव। विवक्षातः कारकाणि भवन्ति इति नियमानुसारेण अधिकरणादीनामपि करणत्वविवक्षया सर्वत्र तृतीयाप्राप्तिसत्वात् द्वितीयासप्तम्योः निरवकाशता भवतीति विवक्षात एव तृतीयाविभक्तिर्भवतीति कथमुच्यते इति शंकायाः निराकरणमत्रमित्थं क्रियते यथा यत्रान्येषामेव करणत्वविवक्षा न तु स्थाल्याः तत्र स्थालीशब्दात् तृतीयाविभक्तिः भवत्येव यथा देवदत्तः काष्ठेन स्थाल्यां पचति। एवमेव यत्र कारकान्तरविवक्षा तत्र विवक्षाभावात् सर्वत्र तृतीयापत्तिरपि नापादनीया। अत एवोक्तं कौण्डभट्टेन यथा **"विवक्ष्यते इत्यनेन सकृदनेकेषां तदभावात्, द्वितीयासप्तम्यादेः अवकाशं सूचयति"**[1] इति। एवंरूपेण सर्वैरेव वैयाकरणैः प्रतिपादितानां करणस्वरूपाणां मतैक्यं दृश्यते। करणस्वरूपपर्यालोचनेन वक्तुमिदं शक्यते यच्छाब्दबोधे कर्तृव्यापारातिरिक्तः करणव्यापारः प्रतीयत एव। तत्र कर्तृवृत्तिव्यापारस्तु धातुवाच्यः किन्तु करणव्यापारस्य पदार्थत्वप्रतिपादनाय तत्र तृतीयायाः शक्तिरावश्यकी। तस्मादाश्रयव्यापारौ द्वावेव कर्तृतृतीयावाच्यौ इति वैयाकरणानां सम्मतिः। कर्तृसंज्ञाविधायकं सूत्रन्तु पूर्वमेव प्रतिपादितम्। अत्र करणसंज्ञाविधायकानि सूत्राणि यथा-

"साधकतमं करणम्"[2]

"दिवः कर्म च"[3] विभाषया करणसंज्ञाविधायकं सूत्रमिदम्।

इत्थमेते पाणिनिना प्रणितायामष्टाध्याय्यां पठिते सूत्रे करणसंज्ञाविधायकेस्तः। एताभ्यां सूत्राभ्यां करणसंज्ञाविहितस्थले करणत्वेन तृतीयाविभक्तिर्विधीयते। एत सूत्रेऽतिरिच्य वार्तिकान्यपि सन्ति करणसंज्ञाविधायकानि। तानि तत्रैव वैयाकरणग्रन्थेषु द्रष्टव्यानि। विस्तरभिया नैवाऽत्र प्रस्तूयन्ते। तृतीयाविधायकानि सूत्राणि यथा- "कर्तृकरणयोस्तृतीया २/३/१८" "अपवर्गे तृतीया २/३/६" "सहयुक्तेऽप्रधाने २/३/१९" "येनाऽङ्गविकारः २/३/२०" "इत्थंभूतलक्षणे २/३/२१" "संज्ञोऽन्यतरस्यां कर्मणि २/३/२२" "हेतौ २/३/२३" "पृथग्विनानानाभि-स्तृतीयाऽन्यतरस्याम् २/३/३२" "सर्वनाम्नस्तृतीया च २/३/२७" "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् २/३/७२" "प्रसितोत्सुकाभ्यां तृतीया च २/३/४४" इत्थमेतानि पाणिनिना प्रणितायामष्टाध्याय्यां पठितानि तृतीयाविधायकानि सूत्राणि सन्ति। एतैः सूत्रैः करणसंज्ञा-विहितस्थले विविधानां पदानां योगे च तृतीयाविभक्तिर्विधीयते। एतानि सूत्राण्यतिरिच्यान्यान्यपि सूत्राणि, वार्त्तिकानि च सन्ति विभाषया तृतीयाविधायकानि। तान्यष्टाध्याय्यां वैयाकरणसिद्धान्तकौमुद्यां द्रष्टव्यानि विस्तरभिया नात्र प्रस्तूयन्ते। इति करणत्वस्य तृतीयाविभक्तेश्च विचारः।

1. वैयाकरणभूषणसार, सुबर्थनिर्णयः पृ.सं.१९८
2. पा.सू.१/४/४२
3. पा.सू.१/४/४५

UGC- CARE Listed
जुलाई-सितम्बर, 2020

शोधप्रभा
वर्ष : 45, तृतीयोऽङ्कः

व्युत्पत्तिवाददिशा नव्यनैयायिकानां धात्वर्थमीमांसा

श्रीश्यामसुन्दरशर्मा*

1. प्रस्तावना -

भारतीयन्यायशास्त्रस्य चिन्तनपरम्परायाः धाराद्वयं प्राच्यन्यायपरम्परा, नव्यन्यायपरम्परा च वर्तते। त्रयोदशशतके जायमानात् गङ्गेशोपाध्यायात्पूर्वं प्राच्यन्यायशास्त्रस्य चिन्तनपरम्परा, तदनन्तरञ्च नव्यन्यायशास्त्रस्य चिन्तनपरम्परा अस्तीति मन्यते। वस्तुतः प्राच्यन्यायशास्त्रं प्रमेयविचारप्रधानम्, अथ नव्यन्यायशास्त्रञ्च प्रमाणविचारप्रधानमस्तीति जानन्ति परम्पराविदः। न्यायशास्त्रे प्रचुरा भाषासामग्री उपलभ्यते। सा च सामग्री प्राच्यन्यायशास्त्रे अव्यवस्थितरूपेण तथा नव्यन्यायशास्त्रे च सा लब्धस्पष्टसमाकारा दृष्टिपथमारोहति। भाषिकसंरचनातत्त्वेषु धात्वर्थस्यान्यतमं स्थानमस्ति। धातुरूपप्रकृतेः कोऽर्थः? विषयेऽस्मिन् त्रिशास्त्रीयपरम्परासु व्याकरणशास्त्र-मीमांसाशास्त्र-न्यायशास्त्रपरम्परासु अतिगहनोऽतिविस्तृतश्च विचारः प्रस्तुतो वर्तते। व्याकरणशास्त्रे तावत् प्राच्यनव्यमतभेदेन विभागद्वयं वर्तते। तत्र प्राच्यवैयाकरणाः श्रीमद्भट्टोजिदीक्षिताः वैयाकरणभूषणकारिकायां 'धात्वर्थः फलव्यापारौ' इति वदन्ति। नव्यवैयाकरणाः श्रीमन्नागेशभट्टाः वैयाकरणसिद्धान्तलघुमञ्जूषायां धात्वर्थः कर्तरि 'फलविशिष्टव्यापारः', कर्मणि च 'व्यापारविशिष्टफलम्' इत्येवं प्रतिपादयन्ति। मीमांसकेषु प्रभाकरः 'फलमात्रम् धात्वर्थ' इत्याम्नाति। न्यायशास्त्रपरम्परायामपि प्राच्यनव्यमतभेदेन विभागद्वयम्। तत्र प्राच्यनैयायिकाः 'धात्वर्थो व्यापारमात्रम्' इति वदन्ति। नव्यनैयायिकेषु भवानन्दः गदाधरभट्टाचार्यश्च 'फलावच्छिन्नव्यापारो धात्वर्थः' इति। तदेवं धात्वर्थविषयमधिकृत्य शब्दविदः प्रवदन्ते। गदाधरभट्टाचार्यैर्व्युत्पत्तिवादे नव्यनैयायिकसम्मतधात्वर्थमादाय वैशद्येन विचारः कृतः।

नव्यनैयायिकमते धात्वर्थस्य स्वरूपं किम्? तन्मते के गुणाः, के वा दोषाः? तत्र कथं दूषणोद्धारः? इति सर्वमत्र गभीरं व्याख्यातम्।

02. नव्यानां धात्वर्थे प्रतिज्ञावाक्यम् -

यथा प्राच्यनैयायिकानां धात्वर्थे **"व्यापारमात्रं धात्वर्थः"** इति प्रतिज्ञावाक्यम्। तथैव नव्यनैयायिकानां धात्वर्थे **"संयोगादिरूपफलविशेषावच्छिन्नस्पन्दो गम्याद्यर्थः"** इति

---

* अतिथिप्राध्यापकः, संस्कृतविभागः, जा. मि. ई. (केन्द्रीयविश्वविद्यालयः), नवदेहली

प्रतिज्ञावाक्यम् । अस्यायमाशयः – नव्यनये धात्वर्थकुक्षौ फलमपि प्रविशति, व्यापारोऽपि प्रविशति। तेन 'फलावच्छिन्नव्यापारो धात्वर्थः' इति ज्ञायते। तस्माद्धेतोः गमिधातोः फलं भवति 'संयोगः' तमन्तर्भाव्य 'संयोगावच्छिन्नव्यापारः' गमिधात्वर्थो भवति। तथा च त्यजिधातोः फलं भवति 'त्यागः'। तमन्तर्भाव्य 'विभागानुकूलव्यापारः' त्यजिधात्वर्थो भवति।

03. नव्यानां कर्मत्वलक्षणम् –

"कर्मत्वं च क्रियाजन्यफलशालित्वम्" इति प्राच्यनैयायिकानां कर्मत्वलक्षणम्। 'क्रियाजन्यफलवत्वं कर्मत्वम्' इति तल्लक्षणस्य रूपान्तरम् । अस्य लक्षणस्यायमाशयः– फलवदिति मतुबन्ताच्छब्दात् 'त्व' इति भावप्रत्ययविहितत्वात् **'मतुबन्ताद्विहितो भावप्रत्ययः प्रकृत्यर्थं गमयति'** इति नियमानुरोधेन फलवत्वं नाम फलमेव, तत्कर्मत्वमिति लक्षणाशयः। क्रियाजन्यं यत्फलं तच्छाली = फलशाली = तदाश्रयः = फलाश्रयः = फलवान् = कर्म, तच्छालित्वम् = फलशालित्वम् = तदाश्रयत्वम् = फलाश्रयत्वम् = फलवत्वम् = कर्मत्व फलरूपमेव भवति । यथा – 'ग्रामं गच्छति चैत्रः' इत्यत्र क्रिया = गमनम्, तज्जन्यफलम् = संयोगः = कर्मत्वं भवति। तदनुरोधेन तदाश्रयस्य = संयोगाश्रयस्य = ग्रामस्य कर्मसंज्ञा भवति, गमनकर्मत्वाश्रयत्वादिति।

तत्र दूषणमुपस्थाप्यते नव्यैः। तद्यथा – 'देवदत्तः प्रयागात् काशीं गच्छति' इत्यत्र यथा काशीनिष्ठसंयोगः गमनव्यापारजन्यः। तथैव प्रयागनिष्ठविभागोऽपि गमनव्यापारजन्य एव। अतः वियोगस्यापि कर्मत्वं स्यात्तदनुरोधेन तदाश्रयस्य प्रयागस्य कर्मसंज्ञा प्राप्नोति इति प्राच्यनैयायिकनये दोषः समुपजायते।

अतो नव्यनैयायिको भवानन्दः कारकचक्रे कर्मत्वस्य नूतनलक्षणं विदधाति। तद्यथा– **'तत्तद्धात्वर्थतावच्छेदकफलशालित्वं तत्तद्धातुकर्मत्वम्'** इति। एतेन गमिधात्वर्थावच्छेदकसंयोगरूपफलशालित्वं गमिधातुकर्मत्वम्, त्यजिधात्वर्थावच्छेदकवियोग रूपफलशालित्वं त्यजिधातुकर्मत्वमिति। 'देवदत्तः प्रयागात् काशीं गच्छति' इत्यत्र प्रकृतधातुः गमिधातुः। तत्तद्धात्वर्थतावच्छेदकफलम् = गमिधात्वर्थावच्छेदकसंयोगरूपफलम्, तच्छाली= तदाश्रयः = काशी। अतः काश्या एव गमनकर्मत्वम्, न तु प्रयागस्य। यदा 'देवदत्तः प्रयागं त्यजति' इति वाक्यम्, तदा प्रकृतधातुः त्यजिधातुः। तत्तद्धात्वर्थतावच्छेदकफलम्= त्यजिधात्वर्थावच्छेदकवियोगरूपफलम्, तच्छाली = तदाश्रयः = प्रयागः। अतोऽत्र प्रयागस्यैव त्यागकर्मत्वं सिद्ध्यति।

04. नव्यानां द्वितीयार्थे प्रतिज्ञावाक्यम् –

प्राच्यनये धातुना व्यापारमात्रस्योपस्थितिर्भवति। अतस्तत्र फलं द्वितीयार्थो भवति। नव्यनये तावद्धात्वर्थेनैव व्यापारसहकृतफलस्याप्युपस्थिर्जायते। अतोऽत्र नव्यपक्षे फलं द्वितीयार्थो न भवितुमर्हति, तस्य धात्वर्थेनोक्तत्वात्। तस्मात् 'फलान्वयिनी वृत्तिरेव द्वि तीयार्थः' भवतीति। अत्र फलस्योपस्थितिर्धात्वर्थेन जायते। धात्वर्थफलमध्यसंसर्गस्य भानम् आकाङ्क्षया जायते। परिशेषाद्वृत्तिमात्रं द्वितीयार्थः। तथैवोक्तं व्युत्पत्तिवादे – **"फलान्वयिनी वृत्तिरेव द्वितीयार्थः"** इति।

05. प्राच्यनव्यनैयायिकानां कर्मप्रत्ययार्थधात्वर्थयोः सिद्धान्तभेदाः –

प्राच्यनैयायिकमते धात्वर्थो 'व्यापारः', द्वितीयार्थः 'कर्मत्वम्'। तत्र कर्मत्वं नाम 'कर्मनिष्ठो धर्मः'। 'ग्रामः' कर्म। अस्मिन् ग्रामे 'संयोगः' तिष्ठति, तस्मादयं 'संयोगः' कर्मनिष्ठधर्मः। तदयं कर्मनिष्ठो धर्मः फलरूपो भवति। तदेवमयं हि निष्कर्षः द्वितीयाविभक्त्या फलोपस्थितिरिति।[1] तत्रैव न्यायशास्त्रे नव्यनैयायिकानां धात्वर्थः 'फलावच्छिन्नव्यापारः', द्वितीयाविभक्त्यर्थः 'फलान्वयिनी वृत्तिः' इति। एतन्मते फलोपस्थितिर्धात्वर्थेनैव भवति। संसर्गः आकाङ्क्षाभास्यः। परिशेषात् द्वितीयाविभक्त्योपस्थापितपदार्थः वृत्तिरिति।[2] एवं प्राच्यनव्ययोः सिद्धान्तविभागाः।

06. आक्षेपः – द्वितीयार्थवृत्तिपक्षे 'कर्मणि द्वितीया' इति सूत्रस्यासङ्गतिः –

यदि नव्यनैयायिकपक्षमाश्रित्य द्वितीयाविभक्त्यर्थो 'वृत्तिः' इति स्वीकुर्मस्तर्हि 'कर्मणि द्वितीया' इति सूत्रस्य सङ्गतिः कथम्? तथा हि सूत्रमिदम् 'कर्मणि' द्वितीयाविभक्तिं विदधाति, न तु 'वृत्तौ'। अतो द्वितीयाविभक्त्यर्थवृत्तिपक्षे 'कर्मणि द्वितीया' इति सूत्रमसङ्गतं भवति।

07. समाधानम् – 'कर्मणि द्वितीया' इति सूत्रघटितकर्मणीत्यत्र वैषयिकसप्तमी –

प्रकृतदूषणस्य समाधानं प्रस्तूयते। तद्यथा – नव्यनैयायिकाः 'कर्मणि द्वितीया' इति सूत्रस्थे 'कर्मणि' इत्यत्र वाचकसप्तमीमस्वीकृत्य वैषयिकसप्तमीं स्वीकुर्वन्ति। वैषयिकसप्तमीविभक्तिपक्षमङ्गीकारे 'कर्मणि द्वितीया' इत्यस्य सूत्रार्थः – 'कर्मणि = फलनिष्ठवृत्त्यन्वयिनि', प्रकृतितात्पर्ये द्वितीयाविभक्तिः स्यादिति।[3] अयमाशयः – यदि 'फलान्वितवृत्तौ' द्वितीयाविभक्तिप्रकृत्यर्थस्यान्वयः संभवः, तदा प्रकृतिभूतग्रामादिप्रातिपदिकोत्तरं द्वितीयाविभक्तिः स्यादिति ।

08. आक्षेपः – द्वितीयार्थवृत्तौ 'कर्मणि द्वितीया' इति सूत्रस्य शक्तिग्राहकत्वानुपपत्तिः–

पूर्वोक्तरीत्या सूत्रेण द्वितीयाविभक्तिः कस्मिन्नर्थे भवतीति न प्रतिपाद्यते, अपि तु कस्मिन्नन्वयतात्पर्ये भवतीत्येवं बोध्यते। एतस्मिन् पक्षे 'कर्मणि द्वितीया' इति पाणिनीयसूत्रं द्वितीयाविभक्तेः शक्तिमनुक्त्वा तस्यास्तात्पर्यमेव प्रतिपाद्यमानं भवतीत्यर्थः। परम् –

---

1. क. 'प्राञ्चस्तु धातोर्व्यापार एवार्थः, फलं द्वितीयार्थः, कर्माख्यातस्यापि फलमर्थः'। विभक्त्यर्थनिर्णयः, पृ. 99. ख. 'धातोः केवलव्यापार एव शक्तिः, फलं कर्मप्रत्ययार्थः, कर्मप्रत्ययापेक्षया बहूनां धातूनां फले शक्तिकल्पनस्य गुरूत्वात्'। पूर्वपक्षरूपे न्यायमतोल्लेखः। वैयाकरणसिद्धान्तमञ्जूषा, नागेशभट्टः, पृ. 43.
2. क. 'द्वितीयाद्यर्थ वृत्तित्वं, तच्च धात्वर्थतावच्छेदकफलेऽन्वेति'। कारकचक्रम्, अनुच्छेदः–34, पृ. 28. ख. नव्यास्तु संयोगादिरूपफलविशेषावच्छिन्नस्पन्दो गम्याद्यर्थः। व्युत्पत्तिवादः, प्रथमभागः, तिरुपतिः, पृ. 209.
3. व्युत्पत्तिवादः, प्रथमभागः, तिरुपतिः, पृ.–209. (सप्तमीविभक्तिप्रकृत्यर्थस्य 'व्यापारान्वयिनी 'वृत्तौ' अन्वयश्चेत्तदा प्रकृतिभूत' ग्रामादि' प्रातिपदिकोत्तरसप्तमीविभक्तिः।)

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति, सान्निध्यतः सिद्धपदस्य वृद्धाः ॥[1]

इत्ययं नियमस्तु व्याकरणस्यापि शक्तिग्राहकत्वमेव प्रतिपादयति । तस्य च नियमस्य भङ्गापत्तिरुपपद्यते। 'कर्मणि द्वितीया' सूत्रघटितकर्मपदस्य शक्तिः 'कर्मणि' 'कर्मत्वे' वा वर्तते, न तु 'वृत्तौ' । 'वृत्तौ' हि कर्मपदस्य तात्पर्यग्रहमात्रमस्तीति निष्कृष्टिः।

09. प्रथमं समाधानम् - अनादितात्पर्यग्रहेण सूत्रस्य शक्तिग्राहकत्वम्[2] -

अत्र गदाधरो ब्रवीति – अनादितात्पर्यमपि शक्तिग्राहकम् ।[3] अनादितात्पर्यग्राहकत्व-परम्परया सूत्रस्य शक्तिग्राहकत्वं ज्ञेयम् । कर्मणस्तावदनादितात्पर्यं 'फलनिष्ठवृत्त्यन्वयिनि एव' । अयमाशयः – कर्मणः अनादितात्पर्यं द्वितीयाविभक्तिप्रकृत्यर्थस्य (प्रातिपदिकार्थस्य) फलान्वितवृत्तौ अन्वयसंभवे सति प्रकृतेः (प्रातिपदिकात्) द्वितीयाविभक्तिर्भवति। अनादितात्पर्येण द्वितीयाविभक्तेरर्थः 'वृत्तिः', तथा च तस्य अनादितात्पर्यबोधाय 'कर्मणि द्वितीया' इति सूत्रमावश्यकम् । एवं परम्परया 'कर्मणि द्वितीया' सूत्रस्य शक्तिग्राहकत्वं वृत्तिपक्षेऽपि अक्षुण्णमेवावतिष्ठति ।

10. द्वितीयं समाधानम् - अनुमानप्रमाणेन सूत्रस्य शक्तिग्राहकत्वम् -

अत्र विद्वन्मनोरमाकारास्ताताचार्याः अनुमानप्रमाणेन सूत्रस्य शक्तिग्राहकत्वं साधयन्ति। तेषाम्मते अनादितात्पर्यपरम्परया द्वितीयाविभक्तेश्शक्तिवृत्तावस्तीत्यनुमीयते। अनुमानप्रकारश्चायम् –'द्वितीया आधेयत्वशक्ता, असति बाधके, स्वघटितवाक्यघटक-पदान्तराबोध्य-आधेयत्वान्वित-स्वार्थतात्पर्यविषयप्रकृतिकत्वात्'।[4] अस्मिन्ननुमाने पक्षः = द्वितीयाविभक्तिः। साध्यम् = आधेयत्वशक्तत्वम्। हेतुः = स्वघटितवाक्यघटकपदान्तराबोध्य-आधेयत्वान्वितस्वार्थ-तात्पर्यविषयप्रकृतिकत्वम्। हेतुनिर्देशकवाक्ये प्रथमस्वपदेन द्वितीयाविभक्तिः ग्रहणीया। द्वितीयस्वपदेन द्वितीयाविभक्तेर्प्रकृतिः ग्रहणीया। स्वम् = द्वितीयाविभक्तिः। स्वघटितवाक्यम् = 'ग्रामं गच्छति' इत्यादि। स्वघटितवाक्यघटकपदम् = अम्। पदान्तरम् = ग्राम, गम्, ति। तैः पदैरबोध्यः = अवाच्यः। आधेयत्वान्वितस्वार्थः (आधेयत्वेऽन्वितस्वार्थः) = आधेयत्वे अन्वितद्वितीयाविभक्तिकप्रकृत्यर्थः (ग्रामार्थः)। स्वार्थस्य = 'ग्रामस्य द्वितीयार्थाधेयत्वान्वयो भवतु' इति वक्तुः तात्पर्यम्, तद्विषयीभूता 'ग्राम' इति प्रकृतिः, तत्कत्वम् 'अम्' विभक्तेः।

---

1. क. न्यायसिद्धान्तमुक्तावली, दिनकरीरामरूद्रीसंवलिता, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2002, पृ. 359.
   ख. शब्दशक्तिप्रकाशिका, पृ. 103-114.
2. अनादितात्पर्यग्रहसंपादकत्वेन परम्परया शक्तिग्राहकत्वसंभवात्। व्युत्पत्तिवादः, प्रथमभागः, तिरुपतिः, पृ.209.
3. लक्षणाशक्यसम्बन्धस्तात्पर्यानुपपत्तिः।
   आसत्तिर्योग्यताकाङ्क्षा तात्पर्यज्ञानमिष्यते॥82॥ न्यायसिद्धान्तमुक्तावली, शब्दखण्डः, पृ. 319, 339.
4. व्युत्पत्तिवादः, विद्वन्मनोरमाव्याख्या, प्रथमभागः, तिरुपतिः, पृ. 210-211.

अयमाशयः – द्वितीयाविभक्तेश्शक्तिः आधेयत्वे, बाधकाभावे द्वितीयाविभक्तिघटित–वाक्यघटकपदेनाबोध्यस्वार्थबोधकप्रकृतिकत्वात्। अनेन 'कर्मणि द्वितीया' इति सूत्रस्य परम्परया शक्तिग्राहकत्वं सिद्धम्। तया अनुमित्या वृत्तिरपि द्वितीयार्थो भवितुमर्हति।

11. तृतीयं समाधानम् – व्युत्पत्या सूत्रस्य शक्तिग्राहकत्वम् –

प्रकृत्यर्थान्वितफलनिष्ठवृत्तितात्पर्ये द्वितीयाविभक्तिर्विधीयते। अत्र प्रकृत्या (प्रातिपदिकेन) प्रकृत्यर्थस्य (प्रातिपदिकार्थस्य) उपस्थितिः, फलोपस्थितिस्तावत् धातुना। इदानीमेकं पदं (द्वितीयाविभक्तिः), एकश्च पदार्थः (वृत्तिः) अवशिष्टः, एतयोः परस्परं शब्दार्थभावेन संबन्धो न स्थापितः। तदा **'अनन्यलभ्यो हि शब्दार्थः'** इति न्यायेन परिशेषात् द्वितीयाविभक्तेर्वृत्त्यर्थेति। अयमाशयः – योऽर्थः केनचिदन्येन पदेन नोपस्थाप्यते सोऽर्थः, तस्य पदस्यैव भवति। एतेन नियमबलेन तस्य पदस्य (द्वितीयाविभक्तेः), तस्य च पदार्थस्य (वृत्तेः) परस्परं संबन्धः स्थाप्यते। इदानीं वक्तुं शक्यते – द्वितीयाविभक्त्या वृत्तेरुपस्थितिर्जायत इति । तदेवमपि प्रकारान्तरेण द्वितीयाविभक्तिशक्तिः वृत्तौ भवितुमर्हति। तेन 'कर्मणि द्वितीया' इति सूत्रस्य शक्तिग्राहकत्वं सिद्ध्यति ।

12. आक्षेपः – पदार्थैकदेशान्वयापत्तिः –

'प्रकृत्यर्थान्वयिनी फलनिष्ठवृत्तिः द्वितीयार्थः' इति नव्यनैयायिकपक्षस्य स्वीकारे पदार्थैकदेशान्वयापत्तिरापतति। यदा द्वितीयाविभक्त्यर्थवृत्तेरन्वयः 'गम्' धात्वर्थसंयोगावच्छिन्न–व्यापारस्यैकदेशे संयोगरूपफले आश्रयत्वसंबन्धेन क्रियते, तदा **'पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन'** इति नियमस्य भङ्गापत्तिः स्पष्टमेव।

तथा हि गमिति धातुपदेनोपस्थापितः पदार्थः 'संयोगावच्छिन्नव्यापारः'। अत्र संयोगः पदार्थैकदेशः, 'व्यापारश्च' पदार्थः। पदार्थे यो विशेषणांशः सः पदार्थैकदेशः। अथ च पदार्थे यो विशेष्यांशः मुख्यविशेष्यो वा सः पदार्थनाम्ना अभिधीयते।

13. समाधानम् – व्युत्पत्तिवैचित्र्यम् (नियमसङ्कोचः) –


ग्रन्थकारः निगदत्यत्र 'व्युत्पत्तिवैचित्र्येण'[1] एकदेशे पदार्थान्वयो भवति। व्युत्पत्तिवैचित्र्यं नाम तावद्व्युत्पत्तिसङ्कोचः। परं सङ्कोचाकारः कः? इति ग्रन्थकाराः भट्टाचार्याः नोद्घाटयन्ति। तदा आदर्शटीकाकाराः सुदर्शनाचार्याः विद्वन्मनोरमाटीकाकाराः रामानुजताताचार्यश्च व्युत्पत्तेः सङ्कोचाकारमित्थं प्रदर्शयन्ति – 'पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' इत्यत्र **"धात्वर्थतावच्छेदकातिरिक्तस्थले, पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन"**[2] एवं सङ्कोचाकारः। अयमाशयः – यदा कस्यचिद् पदार्थस्य धात्वर्थतावच्छेदकेऽन्वयस्तदा

1. 'व्युत्पत्तिवैचित्र्येण प्रकृते एकदेशान्वयस्वीकारात्', व्युत्पत्तिवादः, प्रथमभागः, तिरुपतिः, पृ. 209.
2. क. आदर्शव्याख्या, पृ. 296
ख. विद्वन्मनोरमाव्याख्या, पृ. 211

पदार्थैकदेशेऽप्यन्वयः, अन्यथा पदार्थस्य पदार्थे एवान्वयः। 'गम्'धातुविषये धात्वर्थः = 'संयोगावच्छिन्नव्यापारः', धात्वर्थता = संयोगे, व्यापारे च । धात्वर्थतावच्छेदकत्वम् (अवच्छेदकः = जन्य / विशेषणः) = संयोगः । एतेन नियमेन 'गम्' धातुनोपस्थापिते 'संयोगावच्छिन्नव्यापारस्यैकदेशे 'संयोगे' द्वितीयाविभक्त्यर्थवृत्तेरन्वयेन पदार्थैकदेशान्वया-पत्तेर्निवारणं सम्भवति।


14. आक्षेपः - व्युत्पत्तिसङ्कोचे 'गमनम्, न स्पन्दः' इति प्रयोगस्य प्रामाण्यापत्तिः-

धात्वर्थविषये पूर्वोक्तपरिष्कृतनियमस्य स्वीकारे पदार्थैकदेशान्वयापत्तिर्निवारयितुं शक्यते। परं पूर्वोक्तव्युत्पत्तिसङ्कोचे अन्यापत्तेराविर्भावो जायते। तद्यथा- तथाविधव्याख्यास्वीकारे 'गमनम्, न स्पन्दः' इति प्रयोगः प्रामाणिकः स्यात्। वस्तुस्थितौ नैयायिको वा भवतु, वैयाकरणो वा भवतु, तयोर्दृष्टौ प्रयोगोऽयं निष्कर्षतः अप्रामाणिकः एव। अयमाशयः- 'गमनम्, न स्पन्दः' इत्यत्र गमनपदार्थः 'संयोगावच्छिन्नव्यापारः'। नञ्पदार्थो 'भेदः'। स्पन्दपदार्थो 'व्यापारमात्रम्'। "धात्वर्थतावच्छेदकातिरिक्तस्थले पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन" इति सङ्कुचितव्युत्पत्त्यनुसारेण स्पन्दपदार्थव्यापारस्यान्वयः गमनपदार्थसंयोगावच्छिन्नव्यापारस्य एकदेशे संयोगे भविष्यति। यथा द्वितीयाविभक्त्यर्थवृत्तेः धात्वर्थैकदेशफलसंयोगेऽन्वयः। 'व्यापारः' 'संयोगश्च' उभौ पृथक् पृथक्। 'संयोगो' गुणः, 'व्यापारश्च' क्रिया। अतः 'न' पदार्थस्य 'अभावस्य' (भेदस्य) अन्वयसंभवः। एवमन्वये 'गमनम्, न स्पन्दः' एतस्यार्थः 'गमनम्, स्पन्दात् भिन्नः' अथवा 'गमने, स्पन्दस्य अभावः' अथवा गमनं स्पन्दश्चोभौ भिन्नौ। प्रकृतप्रसङ्गे 'न' पदार्थस्यान्वयसंभवेन 'गमनम्, न स्पन्दः' प्रयोगस्य प्रामाण्यापत्तिः। (आरेखः - 01)



यदि व्युत्पत्तिसङ्कोचं विना 'पदार्थः पदार्थेनान्वेति, न तु तदेकदेशेन' इत्ययं नियमः स्यात्तदा 'गमनम्, न स्पन्दः' इत्यत्र गमनपदार्थव्यापारस्य स्पन्दपदार्थव्यापारस्य च पारस्परिकोऽन्वयः कर्तव्यः । परञ्च गमनपदबोधितव्यापारस्य, स्पन्दपदबोधितव्यापारस्य चाभिन्नत्वात् 'न'पदार्थस्य 'अभावस्य' (भेदस्य) नास्त्यन्वयावसरः । एतेन 'गमनम्,

न स्पन्दः' इति प्रयोगः अप्रामाणिकः स्यात् । वस्तुतः 'गमनम्' इत्यस्य पदार्थः 'व्यापारः' एव, संयोगरूपफलन्तु अस्मिन् गमनव्यापारे विशेषणांशः । सर्वदा विशेष्यांश एव पदार्थत्वेन स्वीक्रियते, न तु विशेषणांशः । वस्तुस्थितौ गमनस्पन्दयोरभेदे 'न' पदार्थस्यान्वयाभावेन प्रयोगोऽयम् अप्रमाणिकः । अधः प्रदर्शितेन आरेखमाध्यमेन अवगन्तुं शक्यते । (आरेखः - 02)



धात्वर्थैकदेशसंयोगे 'न' पदार्थान्वयसंभवेन तद्वाक्यस्य सार्थकत्वात् 'गमनम्, न स्पन्दः' इति वाक्यस्य प्रामाण्यम्। एतस्य वाक्यस्य वैयाकरणाः नैयायिकाश्चोभावपि अप्रमाण्यमङ्गीकुर्वन्ति। उभयोरपि मते 'गमनम्, न स्पन्दः' इत्यत्र पदार्थान्वयस्य बाधितत्वाद्वाक्यस्याप्रमाण्यं निर्णीयते। तथापि पूर्वोक्तव्युत्पत्तिसङ्कोचेन 'गमनम्, न स्पन्दः' इत्यत्र पदार्थान्वयसंभवादाचार्याणां सिद्धान्तविरोधः। अतः 'पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' इत्यस्मिन् 'धात्वर्थतावच्छेदकातिरिक्तस्थले, पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' एवं व्युत्पत्तिसङ्कोचो दोषायैव।

15. प्रथमं समाधानम् - कार्यकारणभावव्युत्पत्तेर्निर्माणम्[1] -

'धात्वर्थतावच्छेदकातिरिक्तस्थले, पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' इति पूर्वोक्तव्युत्पत्तिसङ्कोचस्वीकारेऽपि 'गमनम्, न स्पन्दः' इत्यत्र पदार्थान्वयापत्तेः समाधानं शाब्दबोधाय कार्यकारणभावव्युत्पत्तिनिर्माणेन संभाव्यते। तत्र व्युत्पत्तिस्तावत्- **"तद्विशेष्यकशाब्दबोधं प्रति, तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिः कारणम्"।** पूर्वोक्तापत्तौ 'गमनम्, न स्पन्दः' इत्यत्र पदार्थोपस्थितिकाले गमनपदेन संयोगप्रकारक-व्यापारविशेष्यकपदार्थस्योपस्थितिः । शाब्दबोधकाले च व्यापारप्रकारकसंयोगविशेष्यकबोधः जायमानोऽस्ति । अतः प्रकृतव्युत्पत्तिः "तद्विशेष्यकशाब्दबोधं प्रति, तद्विशेष्यकवृत्तिज्ञानजन्य-

1. अथ 'गमनम्, न स्पन्दः' इत्यादितो धात्वर्थतावच्छेदकफले स्पन्दभेदान्वयबोधसम्भवेन एतादृशप्रयोगस्य वारणाय 'फलविशेष्यकान्वयबोधे तद्विशेष्यकवृत्तिज्ञानजन्यफलोपस्थितित्वेन हेतु' त्वकल्पनस्य आवश्यकत्वात् तादृशकारणबाधेन धात्वर्थतावच्छेदकफले द्वितीयार्थान्वय-असम्भवः। व्युत्पत्तिवादः, प्रथमभागः, तिरुपतिः, पृ. 211.

तदुपस्थितिः कारणम्" इति निर्मीयते । एतस्या अयमाशयः –

- फलविशेष्यकशाब्दबोधं प्रति फलविशेष्यकवृत्तिज्ञानजन्यफलोपस्थितिः कारणम्
- व्यापारविशेष्यकशाब्दबोधं प्रति व्यापारविशेष्यकवृत्तिज्ञानजन्यव्यापारोपस्थितिः कारणम्

उदाहरणं तावत् – 'संयोगो, न स्पन्दः' अत्र संयोगपदस्य संयोगत्वविशिष्टसंयोगः शक्यः। अयं संयोगपदस्य वृत्तिग्रहः। एतस्माद्धेतोः संयोगपदेन संयोगपदार्थस्योपस्थितिः। अत्र संयोगविशेष्यकवृत्तिज्ञानात् 'संयोगस्य' विशेष्यत्वेन उपस्थितिर्जायते। अतः 'तद्विशेष्यकशाब्दबोधं प्रति, तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिः कारणम्' इति व्युत्पत्त्यनुसारं स्पन्दपदपदार्थस्य व्यापारस्य नञर्थेऽभावे, अभावस्य च संयोगान्वयः कर्तुं शक्यते। यतो हि संयोगव्यापारौ भिन्नपदार्थौ। 'व्यापारः' क्रिया, 'संयोगश्च' गुणः। 'संयोगो, न स्पन्दः' इत्यत्र 'व्यापाराभाववान् संयोगः' एवं संयोगविशेष्यकान्वयबोधस्योत्पत्तिर्भवितुमर्हति। संयोगरूपात्मकफलम्, न 'स्पन्दः' एवं रीत्या पदार्थान्वयेन 'संयोगो, न स्पन्दः' इति प्रामाणिकः प्रयोगो व्यवस्थीयते ।

'गमनम्, न स्पन्दः' अत्र 'गमनपदं संयोगावच्छिन्नव्यापारे शक्तम्'। अयं गमनपदस्य वृत्तिग्रहः। एतस्माद्धेतोः गमनपदात् 'संयोगप्रकारकव्यापारविशेष्यक' पदार्थस्योपस्थितिर्जायते। अत्र गमनपदवृत्तिग्रहे 'संयोगस्य' विशेष्यविषयत्वं नास्ति, अपि तु विशेषणत्वेन भानमस्ति। व्यापारस्तु विशेष्यतया भासते। अतः 'तद्विशेष्यकशाब्दबोधं प्रति, तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिः कारणम्' इति व्युत्पत्त्यनुसारं व्यापारविशेष्यकशाब्दबोध एव, न तु संयोगविशेष्यकः। एतदर्थं 'गमनम्, न स्पन्दः' इत्यस्य शाब्दबोधः 'व्यापारभेदवान्, व्यापारावच्छिन्नसंयोगः' न भवितुमर्हति। 'व्यापारभेदवान् व्यापारः' इति व्यापारविशेष्यकबोधस्यैव प्रसक्तिस्स्यात्। परं गमनपदार्थः संयोगावच्छिन्नव्यापारः, स्पन्दपदार्थव्यापाराद्भिन्नो न भवति। सर्वे व्यापाराः क्रियारूपत्वेन समानाः भवन्ति। अतः 'नञ्'पदार्थान्वयाभावेन 'गमनम्, न स्पन्दः' इति प्रयोगः, अस्मिन् पक्षेऽपि तथा व्युत्पत्तिस्वीकारेण अप्रमाणिक एवेति समाधानम्।

16. द्वितीयं समाधानम् – पदसमभिव्याहारस्य कारणता –

ग्रन्थकारः द्वितीयसमाधानं प्रस्तौति – शब्दबोधे पदसमभिव्याहारस्यापि कारणता भवति।[1] यथा 'संयोगो, न स्पन्दः' इत्यत्र फलविशेष्यकस्पन्दभेदान्वयबोधो भवति, तथान्वयबोधः 'गमनम्, न स्पन्दः' इत्यत्र न जायते। यतो हि या शाब्दबोधसामग्री 'संयोगो, न स्पन्दः' इत्यत्रास्ति। सा च सामग्री 'गमनम्, न स्पन्दः' इत्यत्र नास्ति। सामग्र्यां पदपदार्थयोर्गणना। 'गमनम्, न स्पन्दः' इत्यत्र संयोगपदं नास्ति। संयोगपदेन संयोगपदार्थस्योपस्थितिरपि

1. न च यादृशपदसमभिव्याहारज्ञानात् फलविशेष्यकस्पन्दभेदान्वयबोधः प्रसिद्धः, 'तादृशपदसमभिव्याहार-ज्ञानतादृशपदज्ञानजन्य- फलादि-उपस्थितिघटितसामग्र्याः तादृशान्वयबोधोत्पादप्रयोजिकाया' असत्त्वेन उक्तस्थले तदापत्ति-असंभव इति वाच्यम्। व्युत्पत्तिवादः, प्रथमभागः, तिरुपतिः, पृ. 211.

नास्ति। अतः 'गमनम्, न स्पन्दः' इत्यत्र फलविशेष्यकस्पन्दभेदान्वयबोधः संभवति। अर्थात् व्यापारप्रकारकसंयोगविशेष्यकबोधो न संभवति ।

17. आक्षेपः - प्रथमसमाधाने पूर्वोक्तकार्यकारणभावनियमे आक्षेपः - घटपदेन कलशबोधे व्यतिरेकव्यभिचारदोषः -

यदि पूर्वोक्तव्युत्पत्तिः "तद्विशेष्यकशाब्दबोधं प्रति, तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिः कारणम्" इति विद्यते चेत्, तर्हि घटविशेष्यकशाब्दबोधार्थं घटपदोच्चारणेन घटपदार्थो-पस्थितिरावश्यकी स्यात्, तदभावे च घटविशेष्यकशाब्दबोधो न स्यात्। परं सामान्यलौकिकव्यवहारे दृष्टिपथमायाति यत् कश्चन 'घटः आनीयाताम्' इति वाक्यमुच्चारयति। तदा श्रोता घटपदार्थं 'कम्बुग्रीवादिमत्पदार्थं घटव्यक्तिम्' आनयति। यदि च वक्ता 'कलशः आनीयताम्' इति वाक्यमुच्चारयति। तदापि सः श्रोता 'कम्बुग्रीवादिमत्पदार्थं घटव्यक्तिम्' आनयति। तदिह घटपदेन कम्बुग्रीवादिमत्पदार्थोपस्थितिः, कलशपदेनापि कम्बुग्रीवादिमत्पदार्थोपस्थितिः, इदानीं जायमानास्ति। पूर्वप्रदर्शितशाब्दबोधस्य कार्यकारणभावनियमानुसारमेवं न संभवेत्, द्वितीयवाक्ये 'कलशमानय' इत्यत्र कारणसामग्र्यां घटपदस्याभावात्। परमत्र घटपदार्थस्य (कार्यस्य) बोधः बोधानुकूलप्रवृत्तिश्च जायमानास्ति। कारणाभावे कार्यसत्त्वात्सिद्धान्तपक्षिणः सिद्धान्ते व्यतिरेकव्यभिचारदोष इदानीं समुपस्थितः। यत्र कुत्रापि नानापदार्थैरेकविधबोधो भवति। तत्र सर्वत्रापि दोषोऽयं प्रसज्जेत।

18. द्वितीयसमाधाने आक्षेपः - गमनपदस्य संयोगपदार्थे लक्षणा भ्रमो वा[1] -

अत्र पूर्वपक्षी द्वितीयसमाधानमाक्षिपति। अस्मिन् द्वितीयसमाधाने ग्रन्थकारः पदविशेषसमभिव्याहारस्य कारणात् 'गमनम्, न स्पन्दः' इत्यत्र पदार्थान्वयापत्तिं निराकरोति। एवं कृते सति, यथा 'संयोगस्य' स्वतन्त्रोच्चारणे फलविशेष्यकबोधस्तथैव लक्षणया शक्तिभ्रमेण वा गमनपदेन संयोगमात्रस्योपस्थितिः, तदनुकूलं 'गमनम्, न स्पन्दः' इत्यत्र फलविशेष्यकबोधोऽपि स्यात्। एवं रीत्या 'गमनम्, न स्पन्दः' इति समभिव्याहारोऽपि फलविशष्यकबोधकारणसामग्री जाता। तेन इदानीं कश्चन प्रमावान् जनः 'गमनम्, न स्पन्दः' इति वाक्यप्रयोगं कुर्यात्तदा या पदसमभिव्याहाररूपा सामग्री फलविशेष्यबोधकाले पूर्वं विद्यमानः आसीत्, सैव पदसमभिव्याहाररूपा सामग्री इदानीमपि विद्यते। अतः प्रमावतोऽपि 'गमनम्, न स्पन्दः' इति वाक्यात् फलविशेष्यकबोधः स्यात्। परञ्चात्र तथाविधबोधो न भवति। तस्मात्पदसमभिव्यापारस्य कारणता न स्वीकर्तुं शक्यते।

1. यत्र गमनादिपदाद् एव लक्षणया शक्तिभ्रमेण वा स्वातन्त्र्येण फलोपस्थितिः, तत्र फलविशेष्यकस्पन्दभेदान्वय-बोधप्रसिद्ध्या गमनपदसमभिव्याहार-तज्जन्यफलोपस्थिति-घटितसामग्र्याः फलविशेष्यक-स्पन्दत्वाद्यवच्छिन्न-भेदान्वयबोधप्रयोजकताया आवश्यकत्वात्, तद्बलेन शक्तिप्रमाधीनबोधेऽपि फलांशे स्पन्दभेदादिभानप्रसङ्गात्। व्युत्पत्तिवादः, प्रथमभागः, तिरुपतिः, पृ. 211.

19. प्राच्यवैकरणमतेऽपि दोषोऽयम्[1] -

प्राच्यवैयाकरणभट्टोजिदीक्षितः वैयाकरणभूषणकारिकायां धात्वर्थविषये निगदति - 'फलव्यापारयोर्धातुः'।[2] फलं व्यापारश्चोभावपि धात्वर्थ इति। 'फलव्यापारयोः' इत्यत्र द्विवचनप्रयोगेण व्याख्याकाराः 'धातोरेका शक्तिः फले, द्वितीया शक्तिश्च व्यापारे' एवं व्याख्यां कुर्वन्ति। अत्र धातुना फलस्यापि विशेष्यत्वेनोपस्थितिः, व्यापारस्यापि विशेष्यत्वेनोपस्थितिः। एवं स्थिते 'गमनम्, न स्पन्दः' इत्यस्य प्रामाण्यापत्तिः। यदा धातुना फलविशेष्यकोपस्थितिस्तदा संयोगोऽपि पदार्थः। अत्र 'पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' इति नियमस्य प्रसक्तिरपि नास्ति। 'गमनम्, न स्पन्दः' इत्यत्र स्पन्दभेदस्यान्वयो गमनपदार्थसंयोगे सत्त्वे प्रमावतेऽपि 'स्पन्दभेदवत् गमनम्' अयं बोधः स्यादेव हि। एवं ग्रन्थकारः प्राच्यवैयाकरणपक्षं दूषयित्वा अग्रे नव्यनैयायिकपक्षे दूषणस्यास्य समाधानं प्रस्तौति।

20. समाधानम् - पुनश्च व्युत्पत्तिसङ्कोचः[3] -

घटपदेन कलशबोधापत्तिरिति प्रथमाक्षेपः। गमनपदस्य संयोगपदार्थे लक्षणा भ्रमो वेति द्वितीयाक्षेपः। ग्रन्थकारः द्वितीयाक्षेपमनुद्धारयित्वा प्रथमदूषणोद्धाराय प्रयतते। गदाधरभट्टाचार्यः अधुना नव्यनैयायिकपक्षे 'गमनम्, न स्पन्दः' इति प्रयोगस्य प्रामाण्यापत्तिनिवारणाय समाधानं प्रस्तौति। सिद्धान्तपक्षी, पूर्वपक्षिणा प्रदत्ता पूर्वोक्तदूषणनिराकरणाय या वर्तमानव्युत्पत्तिः 'तद्विशेष्यकतत्पदवृत्तिज्ञानजन्यशाब्दबोधं प्रति तद्विशेष्यकतत्पदवृत्तिज्ञानजन्यतद्विशेष्यकोपस्थितिः कारणम्' इति विद्यते। तत्र संशोधनं विधातुं 'तादृशोपस्थित्यव्यवहितोत्तरत्वम्' इति शब्दसमुदायं शाब्दबोधस्य कार्यकारणभावनियमस्य कार्यकुक्षौ नियोजयित्वा **'तद्विशेष्यकतत्पदवृत्तिज्ञान-जन्यतदुपस्थित्यव्यवहितोत्तर - शाब्दबोधं प्रति तद्विशेष्यकतत्पद-वृत्तिज्ञानजन्यतद्विशेष्यकोपस्थितिः कारणम्'** इत्येवम्रूपां व्युत्पत्तिं प्रस्तौति । एतेन -

- घटविशेष्यकघटपदवृत्तिज्ञानजन्यघटोपस्थित्यव्यवहितोत्तरजायमानं शाब्दबोधं प्रति, घटविशेष्यकघटपदवृत्तिज्ञानजन्यघटविशेष्यकोपस्थितिः कारणम् ।
- घटविशेष्यककलशपदवृत्तिज्ञानजन्यघटोपस्थित्यव्यवहितोत्तरजायमानं घटविशेष्यकशाब्दबोधं प्रति घटविशेष्यककलशपदवृत्तिज्ञानजन्यघटोपस्थितिः कारणम् ।

1. एवं च फलव्यापारयोः पृथक् शक्तिस्वीकारपक्षेऽपि न निस्तारः। तथात्वेऽपि हि 'गमनम्, न स्पन्दः' इत्यादौ फलांशे शक्तिप्रमया स्पन्दभेदान्वयबोधसम्भवेन तादृशप्रयोगापत्तेः दुर्वारत्वाद्। व्युत्पत्तिवाद, प्रथमभागः, तिरुपति, पृ. 213.
3. फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ।। वैयाकरणभूषणसारः, धात्वर्थप्रकरणम्, पृ. 13.
3. तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिजन्यतावच्छेदककोटौ 'तादृशोपस्थित्यव्यवहितोत्तरत्व' निवेशनम् आवश्यकम्। विशिष्य तत्तत्पदमन्तर्भाव्यैव पदार्थोपस्थितेः एकैकविधबोधे नानाहेतुतायाः व्यवस्थापितत्वाद्, एकपदाधीनतद्विषयकशाब्दबोधे पदान्तरवृत्तिज्ञानजन्यतदुपस्थितेः व्यभिचारस्य प्रकारान्तरेण वारण-असम्भवात्। व्युत्पत्तिवादः, प्रथमभागः, तिरुपतिः, पृ. 213.

अयमाशयः – यदि घटपदोच्चारणेन घटपदार्थबोधस्तदा घटपदज्ञानं कारणम्। यदि कलशपदोच्चारणेन घटपदार्थबोधस्तदा कलशपदज्ञानं कारणमिति । एतेन व्यतिरेकव्यभिचारः समाप्यते । पूर्वोक्तपरिष्कृतव्युत्पत्तिरेवं संक्षेपेण अवगन्तुं शक्यते –

- घटपदजन्यघटविषयकशाब्दबोधं प्रति घटपदज्ञानं कारणम् ।
- कलशपदजन्यघटविषयकशाब्दबोधं प्रति कलशपदं कारणम् ।[1]

एवं समस्तदोषाणां निराकरणानन्तरं शाब्दबोधाय कार्यकारणभावनियमः **'तद्विशेष्यक-तत्पदवृत्तिज्ञानजन्यतदुपस्थित्यव्यवहितोत्तरशाब्दबोधं प्रति तद्विशेष्य-कतत्पदवृत्ति-ज्ञानजन्यतद्विशेष्यकोपस्थितिः कारणम्'** इत्येवम्रूपः शब्दबोधीयकार्यकारणभावविषयकोऽयं नियमः निर्दुष्टोऽस्ति। अतः 'गमनम्, न स्पन्दः' इति अप्रामाणिकप्रयोगः। तथा च 'पदार्थः पदार्थेनान्वेति, न तु तदेकदेशेन' इत्यस्य सङ्कुचितस्वरूपः **'धात्वर्थतावच्छेदकातिरिक्तस्थले पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन'** इति नियमोऽपि निर्दुष्टः ।

21. आक्षेपः – वृत्तेः पदार्थैकदेशे अन्वयानुपपत्तिः –

यदि 'धात्वर्थतावच्छेदकातिरिक्तस्थले, पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' तथा 'तद्विशेष्यकतत्पदवृत्तिज्ञानजन्यतदुपस्थित्यव्यवहितोत्तरशाब्दबोधं प्रति तद्विशेष्यकतत्पदवृत्ति-ज्ञानजन्य-तद्विशेष्यकोपस्थितिः कारणम्' एतयोरूभयोरपि व्युत्पत्त्योः स्वीकारे सति 'गमनम्, न स्पन्दः' एतस्य प्रामाण्यापत्तेर्निराकरणसंभवेऽपि 'ग्रामं गच्छति' इत्यादिषु वाक्येषु द्वितीयाविभक्त्यर्थवृत्तेरन्वयः 'गम्'धातुनोपस्थापितपदार्थसंयोगावच्छिन्नव्यापारस्यैकदेशसंयोगे न भवितुं शक्यते, यतोहि 'गम्'धातोरुपस्थितिस्तावत्संयोगप्रकारकव्यापारविशेष्यिका अस्ति, न तु व्यापारप्रकारकसंयोगविशेष्यिका ।

22. समाधानम् – आधेयतावान् संयोगः[2] –

'योऽन्वेति सः प्रकारः, यत्र चान्वेति सः विशेष्यः' इति नियमानुरोधेन द्वितीयाविभक्त्यर्थवृत्तिः, 'गम्' धात्वर्थैकदेशसंयोगे आश्रयत्वसम्बन्धेन अन्वेति। पूर्वोक्तनियमबलात् द्वितीयाविभक्त्यर्थवृत्तिः प्रकारः, विशेष्यः 'संयोगः'। अतः 'आधेयता-प्रकारकसंयोगविशेष्यकः' अर्थात् 'आधेयतावान् संयोगः' एवं रीत्या पदार्थान्वयसम्भवेन द्वितीयाविभक्त्यर्थवृतेः धात्वर्थैकदेशसंयोगे अन्वये नास्ति काचिदनुपपत्तिः, व्युत्पत्तिसङ्कोचात्। अपि च द्वितीयनियमेन नव्यनैयायिकमते 'गमनम्, न स्पन्दः' एतस्य प्रामाण्यापत्तेर्निराकरणं निष्कर्षतः जातम्, तेन नव्यनैयायिकमते नास्ति कोऽपि अवशिष्टो दोषः ।

23. उपसंहारः –

1. नव्यनैयायिकपक्षे द्वितीयाविभक्त्यर्थ 'वृत्ति' स्वीकारे 'कर्मणि द्वितीया' इति सूत्रसङ्गतिः कथम्? सूत्रेण 'कर्मणि' द्वितीया विधीयते, न तु 'वृत्तौ' द्वितीयेति दूषणोद्धारप्रकारः –

1. न्यायसिद्धान्तमुक्तावली, शब्दखण्डः, पृ. 367.
2. व्युत्पत्तिवादः, प्रथमभागः, आदर्शव्याख्या, पृ. 300

सूत्रस्थकर्मणीत्यत्र वाचकसप्तमीस्थाने वैषयिकसप्तमी, तेन 'कर्मणि = फलनिष्ठवृत्त्यन्वयिनी', प्रकृतितात्पर्ये द्वितीयाविभक्तिः स्यात्'। परञ्च इदानीं सूत्रं शक्तिबोधकस्थाने तात्पर्यबोधकमात्रं जायमानमस्ति। व्याकरणस्य शक्तिग्राहकत्व-भङ्गप्रसङ्गस्य दूषणोद्धारप्रकारः - अनादितात्पर्योऽपि शक्तिग्राहकः। अनादितात्पर्य-ग्राहकत्वपरम्परया सूत्रस्य शक्तिग्राहकत्वं ज्ञेयम्। तेन द्वितीयाविभक्त्यर्थः 'वृत्तिः'। अनादितात्पर्यबोधाय सूत्रमावश्यकमित्थं सूत्रसङ्गतिः।

2. तदनन्तरं पूर्वपक्षी पदार्थान्वयविषये शङ्कते - यदि द्वितीयाविभक्त्यर्थः 'प्रकृत्यर्थान्वयी फलनिष्ठवृत्तिः' तदा पदार्थैकदेशान्वयदोषापत्तिः। द्वितीयार्थवृत्तेः धात्वर्थस्य संयोगावच्छिन्न-व्यापारस्यैकदेशे संयोगे अन्वये कृते सति 'पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' इति नियमविरोधः । अत्र दूषणोद्धारं कुर्वन् गदाधर एवं ब्रबीति - व्युत्पत्तिवैचित्र्येण एकदेशे पदार्थान्वयसंभवः। व्युत्पत्तिवैचित्र्यं नाम व्युत्पत्तिसङ्कोचः।

परञ्च स च सङ्कोचः कः? इति ग्रन्थकारः न वदति। तदा आदर्शटीकाकारः विद्वन्मनोरमाटीकाकारश्च "धात्वर्थतावच्छेदकातिरिक्तस्थले, पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन" इति सङ्कोचपन्था। एतेन एकदेशान्वयदूषणोद्धारः जातः। परञ्च व्युत्पत्तिसङ्कोचेन 'गमनम्, न स्पन्दः' इति वाक्यस्य प्रामाण्यापत्तिः समुपस्थितः। एतद्दूषणोद्धारमेवं ग्रन्थकारेण विहितम् - पूर्वोक्तसङ्कोचस्वीकारसत्त्वेऽपि कार्यकारणभाव-व्युत्पत्तिः "तद्विशेष्यकशाब्दबोधं प्रति, तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिः कारणम्" इति निर्माणेन समाधानं क्रियते।

पूर्वपक्षी पुनः शङ्कते - यदि पूर्वोक्तव्युत्पत्तिरस्ति चेत्तदा घटविशेष्यकशाब्दबोधाय घटपदोच्चारणेन घटपदार्थोपस्थितिरावश्यकी, अन्यथा घटविशेष्यकशाब्दबोधो न स्यात् । परञ्च सामान्यलौकिकव्यवहारे श्रुतिपथमायाति यत् कश्चन वदति 'घटः आनीयते' तदा श्रोता घटपदार्थं ''कम्बुग्रीवादिमत्पदार्थं घटव्यक्तिम्'' आनयति। यदि वक्ता वदति 'कलशः आनीयते' तदापि सः श्रोता ''कम्बुग्रीवादिमत्पदार्थं घटव्यक्तिम्'' आनयति। अर्थात् घटपदेन कम्बुग्रीवादिमत्पदार्थोपस्थितिः, कलशपदेनापि कम्बुग्रीवादिमत्पदार्थोपस्थितिः, इदानीं जायमानास्ति। परम्, पूर्वप्रदर्शितशाब्दबोधस्य कार्यकारणभावनियमानुसारमेवमयं बोधो न भवितुं शक्यते, द्वितीयवाक्ये 'कलशः आनीयते' इत्यत्र कारणसामग्र्यां घटपदस्याभावात्। परम्, घटपदार्थस्य (कार्यस्य) बोधो बोधानुकूलप्रवृत्तिः जायते। कारणाभावे कार्यसत्त्वात् सिद्धान्तपक्षिणः सिद्धान्ते व्यतिरेकव्यभिचारदोष इदानीं समुपस्थितः। यत्र कुत्रापि नानापदार्थैरेकविधबोधस्तत्र सर्वत्र दोषोऽयं स्यादिति दूषणोद्धार एवम्- 'तादृशोपस्थित्यव्यवहितोत्तरत्वम्' इति शब्दसमुदायः व्युत्पत्तेर्कार्यदले योजयित्वा 'तद्विशेष्यकतत्पदवृत्तिज्ञानजन्यतदुपस्थित्यव्यवहितोत्तरशाब्दबोधं प्रति तद्विशेष्यकतत्पद-वृत्तिज्ञानजन्यतद्विशेष्यकोपस्थितिः कारणम्' इति सङ्कुचितव्युत्पत्तिः।

एतया सङ्कुचितव्युत्पत्त्या 'घटविशेष्यकघटपदवृत्तिज्ञानजन्यघटोपस्थित्यव्यवहितोत्तरजायमानं शाब्दबोधं प्रति, घटविशेष्यकघटपदवृत्तिज्ञानजन्यघटविशेष्यकोपस्थितिः कारणम्' तथा च 'घटविशेष्यककलशपदवृत्तिज्ञानजन्य घटोपस्थित्यव्यवहितोत्तरजायमानं घटविशेष्यकशाब्दबोधं प्रति घटविशेष्यककलशपदवृत्तिज्ञानजन्यघटोपस्थितिः कारणम्' इति ।

3. पूर्वपक्षी पुनः शङ्कते – उभयोरपि व्युत्पत्त्योः स्वीकारे सति 'गमनम्, न स्पन्दः' एतस्य प्रामाण्यापत्तेर्निराकरणसंभवेऽपि 'ग्रामं गच्छति' इत्यादिषु वाक्येषु द्वितीयाविभक्त्यर्थवृत्तेरन्वयः 'गम्' धातुनोपस्थापितपदार्थसंयोगावच्छिन्नव्यापारस्यैकदेशसंयोगे न भवितुं शक्यते, यतो हि 'गम्' धातोरुपस्थितिस्तावत् संयोगप्रकारकव्यापारविशेष्यकोऽस्ति, न तु व्यापारप्रकारक–संयोगविशेष्यक इति दूषणोद्धार एवम् – 'आधेयताप्रकारकसंयोगविशेष्यकः' अर्थात् 'आधेयतावान् संयोगः' एवं पदार्थान्वयसम्भवः। अनेन नव्यनैयायिकमते 'गमनम्, न स्पन्दः' एतस्य प्रामाण्यापत्तेर्निराकारणं विहितम्।

4. अत्र वृत्तिपक्षे 'कर्मणि द्वितीया' इति सूत्रस्य शक्तिग्राहकत्वं क्लेशपूर्वकमुपपादितम्। तथा च पदार्थान्वयस्य परिष्कृतसिद्धान्तः 'धात्वर्थतावच्छेदकातिरिक्तस्थले पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' इति तथा च शाब्दबोधाय कार्यकारणभावसिद्धान्तः 'तद्विशेष्यकतत्पदवृत्तिज्ञानजन्यतदुपस्थित्यव्यवहितोत्तरशाब्दबोधं प्रति तद्विशेष्यकतत्पदवृत्ति–ज्ञानजन्यतद्विशेष्यकोपस्थितिः कारणम्' इति । गदाधरभट्टाचार्यः 'प्रकृत्यर्थान्वयिनी–फलनिष्ठवृत्तिः द्वितीयार्थः' एवञ्च 'फलावच्छिन्नव्यापारो धात्वर्थः' इति नव्यनैयायिकसिद्धान्तेषु समस्तदूषणानामुद्धारः पूर्वोक्तप्रकारेण कृत्वा तेषां सिद्धान्ताः तर्कपुरस्सरं स्थापिताः । इदानीं नव्यनैयायिकसिद्धान्ताः निर्दुष्टाः ।

सन्दर्भसहायकग्रन्थावलिः

1. अन्नम्भट्टः. तर्कसङ्ग्रहः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2003.
2. अमरसिंहः, अमरकोशः, चौखम्बाविद्याभवनम्, वाराणसी, 2015.
3. उपाध्यायः, गिरिधरः. विभक्त्यर्थनिर्णयः, चौखम्बासंस्कृतसीरीज, वाराणसी, 1902.
4. कामाख्यानाथतर्कवागीशः (सम्पादकः), गंगेशोपाध्यायः, तत्त्वचिन्तामणिः (शब्दखण्डः), चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी, 1990.
5. कीर्त्यानन्दः (सम्पादकः), व्युत्पत्तिवादः (गूथार्थतत्त्वलोकसंस्कृतटीकासहितः), चौखम्बा- अमरभारतिप्रकाशनम्, वाराणसी, 1976.
6. गौडः, ज्वालाप्रसादः (सम्पादकः), व्युत्पत्तिवादः (शिवदत्तमिश्रकृतदीपिकासंस्कृत–टीकासहितः), चौखम्बासुरभारतीग्रन्थमाला (66), चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, द्वितीयं संस्करणम्, 1983, पुनर्मुद्रितम्, 2010.
7. चतुर्वेदी, गिरिधरशर्मा परमेश्वरानन्दः भास्करश्च, वैयाकरणसिद्धान्तकौमुदी (वासुदेवदीक्षित–कृतबालमनोरमा तथा च ज्ञानेन्द्रसरस्वतीकृततत्त्वबोधिनी–

संस्कृतव्याख्यासहितः), खण्डानि 38 शोधप्रभा 01-04, मोतीलालबनारसीदासः, देहली, 1958-61.

8. त्रिपाठी, ब्रह्मशङ्करः (सम्पादकः), भवानन्दः कारकचक्रम्, चौखम्बासंस्कृतसीरीज, वाराणसी, 1942.
9. त्रिपाठी, हरेरामः (सम्पादकः), व्युत्पत्तिवादः (सुदर्शनाचार्यकृतादर्शसंस्कृतटीकासहितः), राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, प्रथमं संस्करणम्, 2011.
10. दासः, अच्युतानन्दः (सम्पादकः), व्युत्पत्तिवादः (कृष्णभट्टकृतकृष्णभट्टीया, धर्मदत्तकृत-गूथार्थतत्त्वलोकः, सुदर्शनाचार्यकृतादर्शः, जयदेवकृतजया, शिवदत्तकृतदीपिका, लक्ष्मीनाथकृतप्रकाशः, वेणीमाधवशुक्लकृतशास्त्रर्थकला च संस्कृतव्याख्यासहितः, न्यूभारतीय-बुक-कॉरपोरेशन, देहली, प्रथमं संस्करणम्, 2004.
11. मिश्रः, सच्चिदानन्दः (सम्पादकः), व्युत्पत्तिवादः (सम्पादककृतसुनन्दाहिन्दीव्याख्या-सहितः), भारतीयविद्याप्रकाशनम्, वाराणसी, प्रथमं संस्करणम्, 2001.
12. व्युत्पत्तिवादः (जयदेवमिश्रकृतजयासंस्कृतटीकासहितः), मिश्रः, उमेशचन्दः (सम्पादकः), प्रयागनगरम्, 1988.
13. व्युत्पत्तिवादः (वेणीमाधवशुक्लकृतशास्त्रार्थकलासंस्कृतटीकासहितः), काशीसंस्कृत-ग्रन्थमाला (115), चौखम्बासंस्कृतसंस्थानम्, वाराणसी, तृतीयं संस्करणम्, 1968, पुनर्मुद्रितम्, 2007.
14. शब्दशक्तिप्रकाशिका (कृष्णकान्ति एवञ्च प्रबोधिनीसंस्कृतटीकासहितः), चौखम्बा-संस्कृतसीरीज, वाराणसी, 1934.
15. शास्त्री, भीमसेनः (सम्पादकः), लघुसिद्धान्तकौमुदी (सम्पादककृतभैमीहिन्दी-व्याख्यासहितः), देहली, 1950-80.
16. शास्त्री, वेम्पटिकुटुम्बः (प्रधानसंपादकः). वैयाकरणभूषणसारः (के.वी.रामकृष्णमाचार्य-कृतनृसिंहप्रियासंस्कृतव्याख्यासहितः), श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेलावलः, सोमनाथनगरम्, गुजरातराज्यम्, 2015.
17. शुक्लः,कालिकाप्रसादः(संपादकः).वैयाकरणसिद्धान्तमञ्जूषा,नागेशभट्टः,संपूर्णानन्द-संस्कृतविश्वविद्यालयः, वाराणसी, 1977.
18. श्रीकृष्णवल्लाभाचार्यः(सम्पादकः),विश्वनाथपञ्चाननभट्टाचार्यः,न्यायसिद्धान्तमुक्तावली (शब्दखण्डः), चौखम्बाविद्याभवनम्, वाराणसी, 2005.
19. सतपथी, हरेकृष्णः (सम्पादकः), व्युत्पत्तिवादः (एन्.एस्.रामानुजताताचार्यकृतविद्वन्म-नोरमासंस्कृतटीकासहितः), राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, प्रथमं संस्करणम्, 2011.
20. Bhatt, V.P. Navya Nyaya Theory of Verbal Cognition (Critical Study of Gadadhar Bhattacharya's Vyutpattivada), 01-02, Deccan College, Poona, First Edition, 1996.

UGC- CARE Listed
जुलाई-सितम्बर, 2020

शोधप्रभा
वर्ष : 45, तृतीयोऽङ्कः

कालिदासीया चित्रकला

डॉ. शोभा मिश्रा*

एके सत्कवयः प्रबन्धरचनासौण्डीर्यधुर्याः परे,
नानारूपकसन्धिबन्धकलनाटोपैकबद्धादराः।
वाचामेव विचित्रगुम्फनविधावन्येऽद्भुता किन्तु यः,
सामग्र्येण समग्रतां कवयतेऽसौ कालिदासः परम्॥[1]

कविताकामिन्याः विलासः, कविकुलगुरुः कालिदासो हि कलानिपुणाया भगवत्याः सरस्वत्याः करकमले विद्यमाना सुवर्णतूलिकैव। महामेधसा कविनानेनोपग्रथितानि विश्वप्रसिद्धानि सप्तकाव्यरत्नानि। तत्र सन्ति-

खण्डकाव्यद्वयम्-

1. **ऋतुसंहारम्**
2. **मेघदूतञ्चेति**

महाकाव्यद्वयम्-

3. **कुमारसम्भवम्**
4. **रघुवंशञ्चेति**

नाटकत्रयम्-

5. **मालविकाग्निमित्रम्**
6. **विक्रमोर्वशीयम्**
7. **अभिज्ञानशाकुन्तलञ्चेति।**

कलानार्थकाद् कल् धातोरचि टापि च निष्पद्यते कलेति पदम्। संस्कृतवाङ्मये कलानां सख्या चतुष्ठिः। महर्षेर्वात्स्यायनस्य **कामशास्त्रे** कामसूत्रस्याङ्गविद्यात्वेन गीतम्, वाद्यम्, नृत्यम्, आलेख्यम् चेत्यादयश्चतुष्षष्ठिः कला उपद्दिष्टाः। शृङ्गारप्रियस्यास्य

---

* एसोसिएट प्रोफेसर, संस्कृतविभागः, वी.एस.डी. कालेज, कानपुर, उ. प्र.

1. कालिदासभारती

महाकवेः जागरूकता यथावसरं–

गृहणी, सचिवः, सखा, मिथः, प्रियशिष्या ललिते कलाविधौ।
करुणाविमुखेन मृत्युना, हरता त्वां वद, किं नु मे, हृतम्॥[1]

रघुवंशीय–पद्यरत्नेऽस्मिन् कलापदेन कामसूत्रस्याङ्विद्यासत्वेन परिगणिताः वादित्राद्यश्चतुःषष्टिः कलाः निर्दिष्टाः। एवमेव मालविकाग्निमित्रे गीतनृत्ययोर्निपुणा मालविकाऽपि ललितविधानेन योजिता विधात्रा–

अव्याजसुन्दरीं तां ललितविधानेन योजयता।
परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः॥[2]

निश्चयेन कलामर्मज्ञः कालिदासः जगति विद्यमानाः विविधाः कलाः सातिशयमाद्रियते, प्रस्तूयते च ता अनायासेनैव स्वीयासु रमणीयासु। महाकवेरस्य प्रत्येकं रचना कलानिधानत्वमुपयाति। समासामेवैतासां कलानामेकस्मिन्नेव लघुनि शोधपत्रे संकलनं दुष्करमेव। अतोऽत्र चित्रकलामेव संचिनोमि। कामसूत्रीयासु चतुष्षष्टिकलासु आलेख्यमिति नाम्ना चतुर्थी या कला परिगणिता सैव चित्रमिति गीयते चित्रसूत्रादिषु। विष्णुधर्मोत्तरपुराणस्य प्रसिद्धे चित्रसूत्रे चित्रं ह्युद्घोषितं कलानां प्रवरमिति–

कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम् ।
मांगल्यं प्रथमं चैतद् गृहे यत्र प्रतिष्ठितम्॥[3]

काव्यालंकारकारिकायाम् सनातनकविः कलानां कलान्तराभिः सम्बन्धं स्वीकरोति–

यच्च शब्देषु पद्यत्वं सा संगीतकला प्रिया।
कला कलान्तरे यस्मादलंकारत्वमश्नुते॥[4]

कालिदाससाहित्ये कृतभूरिश्रमः महामहोपाध्यायः रेवाप्रसादो द्विवेदी कालिदास–भारतीति नामके स्वकीये ग्रन्थरत्ने कालिदाससाहित्ये चित्रकलेति शीर्षके निबन्धे उद्घोषयति यत्–

एका कला कलान्तरेऽलंकारत्वं व्रजतीति प्रतीतचरं विदुषाम्। तत्र काव्यमपि कला। तस्याः शब्दैकसंवेद्यत्वेऽपि ततश्चापरोक्षज्ञानविषयत्वेऽपि प्रत्यक्षज्ञानविषया संगीतं, मूर्त्तिः, चित्रं चेति तिस्रोऽपि कला अङ्गभावमलङ्कारभावापरर्यायं व्रजन्त्येव। कालिदासो ह्यस्माकं मूर्धन्यः कविः। तस्य काव्येष्वपि कलान्तराणि निष्प्रयासमेवालङ्कारभावं भजन्ति।

---

1. रघुवंशम् 8/67
2. माविकाग्निमित्रम् 2/13
3. विष्णुधर्मोत्तरपुराणम् 3/43/38
4. काव्यालङ्कारः 63/31

1. चित्रकलायाः सन्दर्भाः-

महाकविः कालिदासश्चित्रकलामिमां नामतोऽप्युल्लिख्यानेकवारं तथाहि-

• कविरनुभवति यत् चित्रार्पिता व्यक्तिरेकरूपैव तिष्ठति, तत्र रूपान्तरं न संभवति। इयमेवास्ति स्थितिः दिलीपस्य रघुवंशस्य द्वितीये सर्गे-

वामेतरस्तस्य करः प्रहर्त्तुर्नखप्रभाभूषितकङ्कपत्रे।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे।।[1]

• कुमारसम्भवस्य तृतीये सर्गे कामदेवमुखेन कविरेषः शिवाश्रमप्रान्ते वसन्तस्य वैभवं वर्णयति। तत्र सर्वोऽपि वसन्तविभवश्चित्रार्पितारम्भ इव जायते-

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम्।
तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे।।[2]

• कुमारसम्भवस्य द्वितीये सर्गे तारकेन बाधिता आदित्या भगवन्तं ब्रह्माणं प्रसादयितुं गताः। तत्र तेषां निस्तेजस्कतां वीक्ष्य ब्रह्मदेवो ब्रूते यदेत आदित्याः प्रकाममालोकितुं शक्याश्चित्रार्पिता इव-

अमी च कथमादित्याः प्रतापक्षतिशीतलाः।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम्।।[3]

• चित्रस्य कृते महाकविरुपादत्ते **आलेख्यमपि** पदम्। कालिदासस्य सर्वेऽपि विरहिणः स्वकीयानां प्रेयसीनाम् आलेख्यानि निर्माय मनोविनोदयितुमिच्छन्ति। पूरूरवाः स्वकीयां विलुप्तां प्रेयसीं आलेख्यार्पितामपि कर्त्तुं न शक्नोति-

हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा,
कथमुपलभे निद्रां स्वप्ने समागमकारिणीम्।
न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां,
मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति।।[4]

• मेघदूते यक्षः शापितः सन् रामगिरिमधिशिश्रिये, तदा तस्यापीयमेव स्थितिः। सोऽपि तत्र शिलायां धातुरागैरात्मीयां वल्लभां यक्षीमालिलेखिषति-

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।

1. रघु0 2/31
2. कुमार0 3/42
3. कुमार0 3/24
4. विक्रमो0 2/10
5. मेघ0-103

अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे

क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः॥[1]

• मालविकाग्निमित्रस्य नायकोऽग्निमित्रः प्रणयवतीं मालविकां प्रथमां चित्रन्यस्तां पश्यति पश्चाच्च साक्षात्। तत्रासौ ब्रूते–

चित्रगतायामस्यां कान्तिविसम्वादशङ्कि मे हृदयम्।
संप्रति शिथिलसमाधिं मन्ये येनेयमालिखिता॥[2]

• अजोऽपि स्वर्गगतामिन्दुमतीं सादृश्यप्रकृतिषु पश्यति–

तेनाष्टौ परिगमिताः समाः कथंचिद्,
बालत्वादवितथसूनृतेन सूनोः।
सादृश्यप्रतिकृतिदर्शनैः प्रियासाः,
स्वप्नेषु क्षणिकसमागमोत्सवैश्च॥[3]

• विक्रमोर्वशीये निपुणिका विदूषकम् आलेख्यगतं वानरमिव निभृतं स्थितं पश्यति–

अहो आलेख्यवानर इव किमपि मन्त्रयन् निभृत आर्यमाणवकस्तिष्ठति।[4]

• कुमारः सुदर्शनो यदा विवाहयोग्यो भवति तदा तस्मै राजकन्यकानां प्रतिकृतय अनीन्ये। स च तत्र याः सुन्दर्यस्ताः स्वीकुरुते। तत्र कालिदासः मालविकाग्निमित्र इव कान्तिविसंवादं स्मरति–

प्रतिकृतिरचनाभ्यो दूतिसन्दर्शिताभ्यः,
समाधिकतररूपाः शुद्धसन्तानकामैः।
अधिविविदुरमात्यैराहृतास्तस्य यूनः,
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः॥[5]

इत्थं चित्रस्य कृते महाकविः कालिदासः प्रतिकृतिशब्दमपि प्रायुङ्क्त।

• विष्णुधर्मोत्तरपुराणे नारायणो मुनिरपि वराप्सरसां निर्मितिं स्मरति–

सहकाररसं गृह्य उर्व्यां चक्रे वरस्त्रियम्।
चित्रेण सा ततो जाता रूपयुक्ता वराप्सराः॥

शकुन्तला हि स्त्रीरत्नम्। सा विधात्रा कथंकारं निर्मितेति जिज्ञासायां दुष्यन्तः संभावनां प्रस्तौति–

---

1. मेघ0–103
2. मालवि0 2/2
3. रघु. 8/92
4. विक्रमो0 2/1/5

चित्रे निवेश्य परिकल्पतसत्त्वयोगा,
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे,
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः।।[1]

• कुमारसम्भवे भगवत्याः पार्वत्याः नखशिखवर्णनं प्रस्तौति वर्णना प्रिया कालिदासस्य लेखिनी। जन्मनः प्रभृत्येव दीपशिखेव प्रभामहती स्फुरत्प्रभामण्डला च भगवती पार्वती सर्वावयवा अनवद्या। तस्याः वपुः तूलिकयोन्मीलितं चित्रमिव दरीदृश्यते–

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम्।
बभूव तस्याश्चतुरस्रशोभिर्वपुर्विभक्तं नौवयौवनेन।।[2]

• रघुवंशे रामादिभिस्तदपत्यैश्च परित्यक्तायामयोध्यायां चित्रलिखितान् द्विपान् सत्यान् मन्यमानाः सिंहास्तेषु प्रहरन्ति–

चित्रद्विपाः पद्मवनातीर्णाः करेणुभिर्दत्तमृणालभङ्गाः।
नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति।।[3]

• रघुवंशे वर्णिताया अस्या एव कालिदासीयाया अयोध्यायाः सन्ति सद्मान्यपि चित्रवति–

तयोर्यथाप्रार्थितमिन्द्रियार्थानसेदुशोः सद्मसु चित्रवत्सु।
प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखान्यभूवन्।।[4]

• मेघदूते अलकायाः भवनान्यपि सन्ति चित्रवन्त्येव–

विद्युद्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तु भ्रंलिहाग्राः
प्रासादस्त्वां तुलयितुमलं यत्र तैस्तेर्विशेषैः।।[5]

• भवनेष्वेषु विद्यमानानि चित्राणि गवाक्षमार्गप्रविष्टैर्मेघैर्विक्रियन्ते। ततश्च तेषां गवाक्षमार्गान्मेघाः शङ्कास्पृष्टा इव निष्पतन्ति–

नेत्रा नीता सततगतिना यद्विमानाग्रभूमी–
रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः।

1. शाकु0 2/10
2. कुमार0 1/2
3. रघु0 16/13
4. रघु0 14/25
5. मेघे0 63

शङ्कापृष्टा इव जलमुचस्त्वादृशा जालमार्गाद्
धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति॥[1]

2. चित्रगता विशेषाः-

विष्णुधर्मोत्तरपुराणे चित्रस्य स्थानं, प्रमाणं, भूलम्भः, मधुरत्वं, विभक्तता, सादृश्यम्, क्षयः वृद्धिश्चेति गुणाष्टकं वर्णितम्-

स्थानप्रमाणं भूलम्भो मधुरत्वं विभक्तता।
सादृश्यं क्षयवृद्धी च गुणाष्टकमिदं स्मृतम्॥[2]

महाकविः कालिदासः चित्रगतान् सर्वानेव विशेषान् यथास्थानं प्रस्तौति। शाकुन्तले चित्रनिर्माणप्रक्रिया प्रस्तूयते। तत्र षष्ठेऽङ्के शकुन्तलां प्रत्यादिश्याङ्गुलीयकलाभेन संजातस्मृतर्दुष्यन्तस्तद्वियोगनिमग्नहृदयस्तस्याश्चित्रं निर्माति। चतुरिका चित्रमिदमादाय प्रविशति तत्र चित्रगतानां विशेषाणामपि उल्लेखः कण्ठरवेणैव कविना क्रियते। चित्रं दृष्ट्वा विदूषकः कथयति-

साधु वयस्य मधुरावस्थानदर्शनीयो भावानुप्रवेशः,
स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु।[3]

एतच्च चित्रं स्वयं राज्ञैव निर्मितम्। अतएव सानुमती ब्रूते-

'अहो एषा राजर्षे र्निपुर्णता, जाने सखी अग्रतो मे वर्तते इति'[4]

राजापि यदा तच्चित्रं वीक्षते तदा कथयति-

यद् यत् साधु न चित्रे स्यात् क्रियते तद् तदन्यथा।
तथापि तस्या लावण्यं रेखया किंचिदन्वितम्॥[5]

3. चित्रस्य षडङ्गत्वम्-

कामसूत्रस्य यशोधरीयायां टीकायां चित्रस्य षडङ्गत्वं प्रतिपादितम्-

रूपभेदाः प्रमाणानि लावण्यं भावयोजनम्।
सदृश्यं वर्णिकाभङ्ग इति चित्रं षडङ्गकम्॥[6]

इमान्येवाङ्गानि कालिदासभारत्यां सनातनकविः कालिदासीया चित्रकलाया उपकरणरूपेणोद्धरति। यथोक्तम्-

1. मेघे0 68
2. विष्णुधर्मोत्तर0 3/43/99
3. शाकु0 6/16/6
4. शाकु0 6/16/71
5. अभिज्ञान0 6/14 इति
6. कामसूत्रम्, अधि.1.अ.3

कालिदासे चित्रकलायाः कानिचित् उपादानानि कण्ठरवेणैवोल्लिखितानि लभ्यन्ते। तद्यथा–

1. कान्तिः,
2. सादृश्यातिशयः,
3. वैसादृश्यलेशः। एतेषु च कारणभूतः
4. समाधिर्नाम गुणविशेषः, स च चित्तवृत्तिनिरोधः, एकाग्रतारूपः। ततश्च वेद्यान्तर-संस्पर्शराहित्येन तन्मयीभवनद्वारा कारूकर्मणि प्रवृत्तिः,
5. कारोः हृदयस्याभिषङ्गः,
6. प्रभावः,
7. मिथ्यात्वं चेति।

4. चित्रेण लाभाः–

सर्वलक्षणसम्पन्नं चित्रं क्षिप्रं श्रियमावहति, अलक्ष्मीमपकर्षति, उत्कण्ठां निर्णेष्यति, आगतं शुभं निरुणद्धि, शुभां प्रीतिं प्रथयति, दुःस्वप्नदर्शनं हन्ति, गृहदैवतं प्रीणाति, शून्यत्वं च निवारयति। यथोक्तं विष्णुधर्मोत्तरे–

शास्त्रज्ञैः सुकृतेर्दक्षैश्चित्रं हि मनुजाधिप।
श्रियमावहति क्षिप्रमलक्ष्मीं चापकर्षति।।[1]
निर्णेष्यति चौत्कण्ठां निरुणद्ध्यागतं शुभम्।
शुभां प्रथयति प्रीतिं जनयत्यतुलामपि।।[2]
दुःस्वप्नदर्शनं हन्ति प्रीणाति गृहदैवतम्।
न तु शून्यमिवाभाति यत्र चित्रं प्रतिष्ठितम्।।[3]
सलक्षणं चित्रमुशन्ति धन्यं देशस्य कर्तुर्वसुधाधिपस्य।
तस्मात्प्रयत्नेन सलक्षणं तत्कार्यं नरैर्यत्नपरैर्यथावत्।।[4]

निश्चयेन महाकवेः कालिदासस्य काव्येषु चित्रकला सर्वाङ्गसम्पन्ना गौरवेणोप-निबद्धास्ति।

सन्दर्भग्रन्थाः–

1. कालिदासभारती– रचयिता– महामहोपाध्यायः रेवाप्रसादद्विवेदी, प्रकाशकः–डॉक्टर सदाशिवकुमारो द्विवेदी, प्रकाशनम्– कालिदाससंस्थानम्, वाराणसी–5, प्रकाशनवर्षम्–2005, पृष्ठसंख्या–1

1. विष्णुधर्मोत्तर0 3/43/24
2. विष्णुधर्मोत्तर0 3/43/25
3. विष्णुधर्मोत्तर0 3/43/26
4. विष्णुधर्मोत्तर0 3/43/27

2. कालिदासग्रन्थावली–(काव्यखण्डं नाट्यखण्डमिति भागद्वयात्मकं, हिन्दीभाषानुवादसहितञ्च) तृतीयं संस्करणम् प्रधानसम्पादकः– डॉ. मिथिलाप्रसादत्रिपाठी, सम्पादकोऽनुवादकश्च महामहोपाध्यायः रेवाप्रसादद्विवेदी, संयुक्तसम्पादकः– डॉ. सदाशिवकुमारो द्विवेदी, प्रकाशनम्– कालिदाससंस्कृति अकादमी, उज्जयिनी, प्रकाशनवर्षम् 2008

3. क. पाणिनीयमूलधातुपाठः प्रक्रियानुसारी–महामहोपाध्याया पुष्पादीक्षिता, संस्कृतभारती, नवदेहली, 2011

ख. पाणिनीयधातुपाठः सार्थः– महामहोपाध्याया पुष्पादीक्षिता, संस्कृतभारती, नवदेहली, 2011

4. कामसूत्रम्– श्रीयशोधरविरचितया जयमङ्गलेतिव्याख्यया सहितम्, हिन्दी व्याख्याकारः– श्रीदेवदत्तशास्त्री, प्रकाशकः–चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, 1964 पृष्ठ संख्या 83–84

5. रघुवंशम्–(आचार्यमल्लिनाथकृतसंजीवनीटीकासहितम्, प्रो. हरिदामोदरवेलणकरकृत–भूमिकया युतम्)– सम्पादकः– नारायणराम आचार्यः, प्रकाशकः– निर्णयसागर–मुद्रणालयः, मुम्बई 2, प्रकाशनवर्षम्–1984, एकादशं संस्करणम्।

6. विष्णुधर्मोत्तरपुराणम्– महर्षिर्वेदव्यासः, क्षेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटश्वरस्टीममुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्, प्रथमः भागः, नाग पब्लिशर्स, जवाहर नगर दिल्ली 07, 1985

7. काव्यालङ्कारकारिका (अभिनवं काव्यशास्त्रम्)–प्रणेता आचार्यरेवाप्रसादद्विवेदी, प्रकाशक– कालिदाससंस्थानम्, वाराणसी, तृतीयं संस्करणम्, 2014

* * *

UGC- CARE Listed
जुलाई–सितम्बर, 2020

शोधप्रभा
वर्ष : 45, तृतीयोऽङ्कः

वैदिकवाङ्मये यमनियमयोः स्वरूपम्

ज्योत्सना*

भूमिका

योगदर्शनं साङ्ख्यदर्शनमिव बन्धनस्य मूलकारणत्वेन अविवेकं (Non-discrimination) अभ्युपगच्छति। प्रकृतिपुरुषयोः पार्थक्यस्य ज्ञानविरहितादेव पुरुषाः बन्धनग्रस्तो जायते। अत एव मोक्षमवाप्तुं तत्त्वज्ञानस्योपर्यधिकतया बलं देदीयते। योगदर्शनस्य मतानुसारं मानवस्तावत्पर्यन्तं न तत्त्वज्ञानं प्राप्तुं पारयन्ति यावत्पर्यन्तं तस्य चित्तां विकारैः परिपूर्णानि वर्तन्ते। अतो योगशास्त्रे चित्तस्य स्थिरताप्राप्त्यर्थं तथा च चित्तवृत्तीनां निरोधाय योगमार्गोऽर्थादष्टाङ्गयोगो वर्णयामास। अष्टाङ्गयोगः– 1. यमः, 2. नियमः, 3. आसनम्, 4. प्राणायामः, 5. प्रत्याहारः, 6. धारणा, 7. ध्यानम्, 8. समाधिः। इत्थं प्रकारेण मयेह अष्टाङ्गयोगस्थयोर्यमनियमयोः वैदिकस्वरूपस्योपरि दृष्टिपातश्चिकीर्ष्यते।

यमनियमयोर्निर्वचनम्

'यम् उपरमे' इति धातोः 'अप्' प्रत्यये कृते यम इति रूपं सिद्ध्यति।[1] उपरमस्यार्थो भवति शान्तो भावोऽथवा पार्थक्यभावो भवति। यमास्ते भवन्ति येषामनुष्ठानेनेन्द्रियाण्यस्माकं तद्विषयेभ्यः पृथग्भवितुमर्हन्त्यथवा विमुखानि जायन्ते। तदित्थं यमो निषेधात्मक (Negative) इत्यवगम्यते। "यम्यन्ते उपरम्यन्ते निर्वर्त्यन्ते हिंसादिभ्य इन्द्रियाणि यैस्ते यमाः"।

नियमास्तु ते भवन्ति ये यमैरस्माकं स्वच्छे शुद्धे निर्मले वा हृदये नियमिताः क्रियन्ते। अर्थान्नियमा एते विधेयात्मकाः (Positives) सन्ति। यमैर्द्वारा कृतस्वच्छनिर्मलं हृदयं नियमैरलङ्क्रियते। "नियम्यन्ते कर्त्तव्यतया निश्चीयन्तेऽमीति नियमाः"। नियमानां पालनेन साधकाः शुद्धाः पवित्राश्च जायन्ते। तथा ह्येवं वयं वक्तुं शक्नुमो यद्यमाः वैयक्तिका आन्तरिकाश्च गुणाः भवन्त्येवं नियमाः सामाजिकास्तथा बाह्याः गुणाः भवन्ति।

---

* शोधच्छात्रा, साङ्ख्ययोगविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–16

1. यम उपरमे+अप् प्रत्यय, यमः समुपनिविषु (अष्टाध्यायी–3/3/63)

वेदेषु यमशब्दः

वेदेषु पञ्चापि यमाः पञ्चापि नियमाः कस्मिंश्चिदेकस्मिन् मन्त्रे सूक्ते वा मिलिततया परिगणिता न प्राप्यन्ते। अपितु प्रकरणानुसारं यमानां स्वरूपज्ञानं सम्भवति। निम्नलिखितमन्त्राः द्रष्टव्याः भवन्ति –

1. "शकेम रायः सुधुरो यमं तेऽधिश्रवो देवभक्तं दधानाः"। ऋग्वेदः 1/73/10
2. "आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे"। ऋग्वेदः 1/83/5
3. "यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत्"। ऋग्वेदः 1/163/2, यजुर्वेदः 29/13
4. "यस्मिन्वृक्षे सुपलाशे देवैः सम्पिबते यमः''। ऋग्वेदः 10/135/1

यमनियमयोः सङ्ख्या

योगदर्शनानुसारम् अहिंसा–सत्य–अस्तेय–ब्रह्मचर्य–अपरिग्रहभेदेन पञ्च यमाः भवन्ति। उक्तञ्च–**अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः**[1] इति। तथैव "शौचसन्तोषतपः **स्वाध्यायेश्वरप्रणिधानानि नियमाः**[2] इत्यपि निगदितमर्थात् शौच–सन्तोष–तपः–स्वाध्याय–ईश्वरप्रणिधानभेदेन नियमा अपि पञ्च वर्तन्ते। मनुस्मृतावपि[3] यमानां सङ्ख्या नामानि च योगदर्शनवदेवोपलभ्यन्ते। परन्तु नियमास्तु मनुस्मृत्यनुसारम् अक्रोधः, गुरुशुश्रूषा, शौचः, आहारलाघवम्, सतताप्रमादश्चैते पञ्च भवन्ति।[4] एतेषु प्रमादस्य गणना योगस्यान्तरायेषु कृता विद्यते। उपनिषत्स्वपि यमनियमयोश्चर्चा योगदर्शनात्किञ्चित्पृथक्तया कृता दृश्यते। केषुचिदुपनिषत्सु दश यमाः दश च नियमाः प्रतिपादिता एवं योगदर्शनोक्तनियमाः यमेष्वेव समाविष्टाः दृश्यन्ते।

यथा–शाण्डिल्योपनिषदि, जाबालोपनिषदि तथा त्रिशिखिब्रह्मणोपनिषदि समानरूपेण दशानां यमानां परिगणनं दृश्यते। त्रिसृष्वप्येतासूपनिषत्सु दशैव नियमाः प्रकीर्तिताः सन्ति। त्रिशिखिब्रह्मणोपनिषदि देहादिन्द्रियाणां वैराग्यभावना यम इत्युच्यते[5], एवं परतत्त्वरूपे परमात्मन्यनुरक्तिर्नियम इति कथ्यते।

सामाजिक्यां व्यवस्थायां सहायकत्वेन विद्यमानत्वाद्यमाः सार्वकालिकाः, सार्वभौमाः, सार्वजनीनाश्च महाव्रता इति निगद्यते।[6] अर्थाज्जातिदेशादिसीमरहितत्वेन सर्वकर्मसु, सर्वावस्थासु, सर्वस्थानेषु पालनीयाः भवन्ति। समाजे यस्मिन् यमानां पालनं

---

1. योगदर्शनम् 2/30
2. योगदर्शनम् 2/32
3. अहिंसासत्यवचनं ब्रह्मचर्यकल्कता। अस्तेयमिति पञ्चैते यमाः परिकीर्तिताः।। मनुस्मृतिः 4/11।।
4. अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम्। अप्रमादश्च सततं पञ्चैते नियमाः स्मृताः।। मनुस्मृतिः 4/112।।
5. देहेन्द्रियेषु वैराग्यं यम उच्यते बुधैः । त्रिशिखिब्रह्मणोपनिषद्, श्लोक–28
6. जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्। योगदर्शनम् 2/31

भवति सः समाज उन्नतेः शिखरमेति। महर्षिणा पतञ्जलिना योगदर्शने यमस्याङ्गपञ्चकं प्रत्यपादि–1. अहिंसा 2. सत्यम् 3. अस्तेयम् 4. ब्रह्मचर्यम् 5. अपरिग्रहः।

अहिंसा

व्यासमहर्षेर्मतानुसारं सर्वाषु प्राणिषु सार्वदिकस्तथा सार्वथिको द्रोहभावनाभावोऽहिंसा भवति। इत्थमहिंसायाः क्षेत्रमतिविस्तृतं जातम्। अन्ययमानां सत्यादीनां मूलरूपेणाहिंसैव विद्यते। अहिंसायाः साधनार्थं सिद्ध्यर्थं वैवान्ये यमनियमा उक्ताः। कायिकवाचिक–मानसिकैतत्तृतयरूपेण अहिंसेह विवक्षिता विद्यते। यमनियमेषु सर्वेष्वहिंसायाः श्रेयस्त्वं कुतो विद्यत इति चेदस्यां सकलप्राण्योद्देश्यिका मैत्र्याः भावना निहिता विद्यते। कामक्रोधादिमनोवृत्तीनां वशीभूतो भूत्वा कस्मैचित्प्राणिने शारीरिकं, वाचिकं, मानसिकमथवा केनाऽप्यन्यप्रकारेण पीडा दीयते चेत्सा हिंसेत्युच्यते। विपरीतैतामहिंसा भवति। ''अहिंसा परमो धर्म'' इत्युक्त्वा सर्वेषामितरेषामपेक्षयाहिंसायाः महत्त्वं सूचितम्। इयमेव यमानां मूलभूता विद्यते। प्रत्येको जनः कष्टेभ्यो बिभेत्येवं तेभ्यो मोचनमपि काम्यते। अतः प्रत्येकमपि प्राणिनं स्वमिवावगच्छेयुः। व्यक्तिर्या प्राणिमात्रे निजस्वरूपं दिदृक्षते पश्यति च सा न कदापि कस्मिन्नपि द्वेष्टि।[1] तथा तस्याः मोहशोकादिकमपि न सम्भवति।

सत्यम्

कस्यचिदपि वस्तुनो यथार्थं ज्ञानमेव सत्यमित्युच्यते। मनसा वचसा कर्मणा वा न कदापि केनापि जीवेन साकमसत्याचरणं क्रियेत। इदमेव वाक्यं भाष्यकारो व्यासो ब्रूते यद्यथा अदृश्यत अन्वमीयत अश्रूयत वा तस्य तथैव वाण्या कथनं तथैव मनसि धारणं सत्यमित्युच्यते। किन्त्विदं प्राणिनां कल्याणायैव स्यात्। वेदेष्वपीत्थं वर्णनं प्राप्यते यथा ''वाचं वदत भद्रया'' इति। सत्यप्रतिष्ठितव्यक्तेः प्रत्येकं कार्यं फलवद् भवति, कदापि निष्फलं न जायते। एतादृशव्यक्तिद्वारा कृतं चिन्तितमुक्तं वा सर्वमपि कार्यं पूर्णतां नूनमेति। उपनिषत्स्वपि **सत्यमेव जयते**[2] इत्यादि सत्यवचनस्य ऋतवचनस्य च प्रतिज्ञाः सन्ति। छान्दोग्योपनिषद्युपलब्धकथानुसारं सत्योक्तेः कारणादेव सत्कामाय जाबालर्षिणेदं नामधेयं दत्तमासीत्। बृहदारण्यकोपनिषदि सत्यमेव धर्मरूपेणाभ्युपगता विद्यते।

अस्तेयम्

अन्यायपूर्वकमथवा चौर्यकर्मणा कस्यचिदपि द्रव्यादिवस्तुनो ग्रहणं स्तेयमित्युच्यते तथाऽस्य विपरीतमस्तेयमित्युच्यते। अर्थान्मनसा कर्मणा वाचा वा चौर्यानाचरणमस्तेयं भवति। अत्र द्रव्यादिवस्तुचोरणेन धनापहरणमेव न विवक्षितमपिंतु बलहीनानां दमनम्, बलादधिकारनिर्ग्रहणम्, कर्तव्यविभ्रमः, अपमिश्रणमित्यादीन्यप्यस्मिन्नेवान्तर्भवन्ति। अत एव तृणस्य वा काञ्चनस्य न कस्यचिदपि कामः कर्तव्यः। यजुर्वेदे कस्यचिद्धनं लुब्धदृशा

1. यस्तु सर्वाणि भूतान्यात्मैवाभूद्विजानतः। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।। यजुर्वेदः 40/6 (ईशोपनिषत्)
2. मुण्डकोपनिषद् (13/16)

अनीक्षणस्यादेशो विद्यते।[1] अस्तेयस्य प्रतिष्ठावद्व्यक्तेर्जगतः किमपि पदार्थो वस्त्वप्राप्यं न भवति। अतः साधकेन प्रत्येकेनाथवा प्रत्येकया व्यक्त्या नूनमस्तेयस्य साधना कर्तव्या।

ब्रह्मचर्यम्

जितेन्द्रियो भूत्वोपस्थेन्द्रियस्य संयमनं ब्रह्मचर्यमित्यभिधीयते। मनुष्यस्योन्नतेयर्थमिद-मुत्कृष्टतमं तपो भवति। ऊर्ध्वरेता मनुष्यः देवतुल्यो भवति। देवताः मृत्युं ब्रह्मचर्याचरणेनैव जिग्युरेवमिन्द्रोऽपि ब्रह्मचर्यस्याचरणेनैव देवराजपदमलङ्चक्रे। तथा च ब्रह्मचर्यहेतुनैवेन्द्रो दोवेभ्यः सुखसामग्रीं सङ्कलयामास। अब्रह्मचारिणां जीवनमपि मरणतुल्यं बुध्यते। यतोहि सः सदा अशक्तोऽसमर्थश्च वरीवर्त्ति। जितेन्द्रिया एव शासनं कर्तुं समर्थाः।[2] विदग्धचित्तमनुष्येभ्य एतद्वक्तुं योग्यं भवति ब्रह्मचर्यमर्थात्केवलं वीर्यस्य रक्षा न भवति। अपि तु समस्तनिम्नकोटिस्थव्यवहाराणां त्यागेन महापुरुषैर्निर्दिष्टवर्त्मानुचरणमेवं महच्चरित्रवतः परमेश्वरस्य चरित्रस्यानुपालनञ्च भवति ब्रह्मचर्यम्। उपनिषत्स्वात्मदर्शनायावश्यकत्वेन ब्रह्मचर्यमभिमतं विद्यते। अनेकेषु स्थानेषूपनिषत्सु तपःसत्यश्रद्धाब्रह्मचर्याणामेतेषां चतुर्ण्णां युगपदुल्लेखो दरीदृश्यते। मुण्डकप्रश्नोपनिषदोरसकृद्वारमेतादृशं वर्णनं प्राप्यते।

अपरिग्रहः

'ग्रह उपादाने' इति धातोः 'परि' इत्युपसर्गपूर्वकत्वे घञ्प्रत्ययान्तत्वे च 'परिग्रह' इति रूपं सिद्ध्यति। यस्यार्थो भवति-परितः सर्वतः ग्रहः। चतुर्मुखत्वेन भोगसाधनानां ग्रहणमिति यावत्। 'न परिग्रहोऽपरिग्रह' इति व्युत्पत्त्या परिग्रहस्य विपरीतो भवत्यपरिग्रहः। अर्थाद्भोगसाधनानामग्रहणम्। जीवनदायकात्यावश्यकपदार्थान्नतिरिच्येतरपदार्थानां धन-धान्यानां, भूमिवस्त्राणां, खाद्यसामग्रीणां प्रभृतीनामग्रहणमपरिग्रह इत्यभिधीयते। वैदिकसंहितासु पारिवारिकपालनपोषणाय सामाजिकव्यवहाराय च पुष्कलधनैश्वर्यस्य याचनाऽकारि। परन्तु सङ्गृहीतानां धन-भोगैश्वर्याणां केवलं स्वस्वार्थसाधनायोपयोगस्य प्रबलो विरोधोऽपि वेदेषु सुष्ठ्वकारि। तथा त्यागपूर्वकोपभोगस्यैव वेदाः पक्षधराः।

नियमाः

यमाः यदि सामाजिकोन्नतय आवश्यकत्वेन कल्पितास्तर्हि नियमाः वैयक्तिकोन्नतयेऽनिवार्या इत्यभिज्ञेयाः। वेदेषु यमनियमयोरुपमा पक्षिणः पक्षद्वयेन समं कृता विद्यते।[3] यमस्येव नियमस्यापि महर्षिणा पतञ्जलिना योगदर्शने पञ्च भेदाः प्रोक्ताः सन्ति-

1. शौचः 2. सन्तोषः 3. तपः 4. स्वाध्यायः 5. ईश्वरप्रणिधानम्।

---

1. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
   तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।। यजुर्वेदः 40/1 (ईशोपनिषत्)
2. जितेन्द्रिय हि शक्नोति वशे स्थापयितुं प्रजाः । मनुस्मृतिः 7/44
3. इमौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहंसस्यग्ने । यजुर्वेदः 18/52

शौचः

'शुचिर् पूतीभावे' इतिधातोरिन्प्रत्ययान्त 'शुचि' शब्दाद्भावेऽण्प्रत्यये कृते 'शौच' इति रूपं निष्पद्यते, यस्य पवित्रतेत्यर्थो भवति। वैदिकसंहितासु पवित्रतावाचिनः पूताः, पावनम्, पवमानः, शुद्धिः, शुद्धाः, शुन्धामि, शक्रः, शुचिरितिप्रभृतीनि पदानि प्रयुक्तत्वेन दृष्टिगोचराणि जायन्ते। उपनिषत्स्वाचरणाहारयोः पवित्रताविषये विशेषं बलं देदीयते। कठोपनिषदि तु स्पष्टतररूपेणोक्तं विद्यते यद्यो सदैव पवित्रस्तिष्ठति स एव ब्रह्मपदप्राप्त्यर्हो भवति नान्य इति।[1] योगदर्शनानुसारं शौचे सिद्धे सति बुद्धिशुद्धिः, मनसः प्रसन्नता, एकाग्रता, जितेन्द्रियता, आत्मदर्शनयोग्यता च सम्पद्यन्ते। ऋग्वेदर्चाऽपि शुद्धये पवित्रतायै च प्रेरणां ददाति।

सन्तोषः

'सम्' इत्युपसर्गपूर्वकात् 'तुष् तुष्टौ' अथवा 'तुष् प्रीतौ' इतिधात्वन्यतरस्माद्भावे घञ्प्रत्यये कृते 'सन्तोष' इति निष्पद्यमानस्य शब्दस्यार्थः सम्यक्प्रकारेण तुष्टिरेवं प्रीतिर्वा भवति। अर्थाच्छरीरेण विहितपूर्णपुरुषार्थद्वारा प्राप्तधनादधिकस्य मोहो लोभो वाकरणं, न्यूनाधिकं यत्किञ्चिदवाप्तं तमधिकृत्य शोकस्य हर्षस्य वा निराकारः। वैदिकसंहितासु सन्तोषवाचिरूपेण तोषमानाः, तुष्यन्ती, तोषतमा इत्यादीनि पदानि प्रयुक्तानि। सन्तोषः सुखानां सर्वप्रकारकानां मूलं वर्तते तथाऽसन्तोषेण दुःखप्राप्तिर्भवति।[2] सर्पः गजो वा सन्तोषयुक्तत्वादेव बलिष्ठोऽस्ति। तृष्णायाः नाशेनैव यथार्थसुखस्य प्राप्तिर्भवति। अतस्तृष्णायाः (कामनायाः) पूर्णतया परित्याग एव संतोष इत्यभिधीयते। सन्तोषादूर्ध्वं न किञ्चिदन्यत्सुखमिह विद्यते। ईशावास्योपनिषद्युक्तं यन्मनुष्यैस्त्यागभावनापूर्वकमेवोपभोगः कार्य एवमन्येषां धनस्य लोभो न कार्य इति च।

तपः

'तप्' इत्यमुं शब्दमभिव्यञ्जयितुं वेदेषु धातुत्रितयं प्रयुक्तं विद्यते यस्य सङ्कलनं महर्षिणा पाणिनिना धातुपाठाख्ये ग्रन्थे संतोष-ऐश्वर्य-दाहार्थेषु कृतं विद्यते।[3] शरीरस्येन्द्रियाणां मनसः प्राणानाञ्च विधिपूर्वकं वशीकरणमेव तप इति निगद्यते। तपसैव क्षुधा, पिपासा, शीतोष्णौ, सुखदुःखे, हर्षशोकौ प्रभृतयो य एते द्वन्द्वाः सन्ति तान् सोढुमपेक्षितसामर्थ्यप्राप्तिर्भवति। साधनवर्त्मस्थविघ्नान् परिक्रम्य साधकाः लक्ष्यपर्यन्तं प्राप्ताः भवन्ति। वस्तुतः चित्तस्यैतावद्वशीकरणमावश्यकं येन साधकः श्रेयमार्गाद्विचलितो न जायेत। यतो हि अतपस्विनां योगसिद्धिर्न जायते।[4] तपसाऽशुद्धीनां नाशेन शरीरस्येन्द्रियाणाञ्च सिद्धिर्भवति। उपनिषत्स्वनेकवारं तपश्शब्दोल्लेखेन तपसा ब्रह्मप्राप्तिर्भवतीति प्रत्यपादि तथा तपः साक्षाद्ब्रह्मेत्यप्युपापादि।

---

1. यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद् भूयो न जायते।। कठोपनिषद् 3/8
2. सन्तोषमूलं हि सुखं दुःखमूलं हि विपर्ययः । मनुस्मृतिः 4/12
3. तप सन्तापे (भ्वा. प.), तप ऐश्वर्ये (दि. आ.), तप दाहे (चु. स. णिजन्त)
4. नातपस्विनो योगः सिद्ध्यति । योगदर्शनम् 2/1 (व्यासभाष्यम्)

स्वाध्यायः

शौचसन्तोषतपसां वृद्धिः स्वाध्यायेन भवति। स्वाध्यायेन स्वाध्ययनं तु भवत्येव येन बाह्यवातावरणं प्रेर्यते। स्वाध्यायेन वेदशास्त्राणामध्ययनमप्यभिप्रेतं विद्यते। स्वाध्यायक्षेत्रे प्रवचनमप्यन्तर्भवति। व्यासः 'मोक्षशास्त्राध्ययनं प्रणवजपञ्च' स्वाध्यायत्वोनाब्रवीत्।[1] वेद-वेदाङ्गानां तथा तदनुकूलेतरशास्त्राणाञ्चाध्ययनं, गायत्रीमहामन्त्रस्य जपः, प्रणवस्य च जपः तत्त्वज्ञानमित्युच्यते येन साधकः स्वयथार्थस्वरूपं ज्ञातुं प्रभवति। स्वाध्यायेनेष्टदेवतायाः साक्षात्कारो जायते। महर्षिणा पतञ्जलिना योगदर्शने स्वैध्यायस्योल्लेखोऽष्टाङ्गयोग-क्रियायोगसन्दर्भयोः कृतो विद्यते। तैत्तिरीयोपनिषदि स्वाध्यायेन साकं प्रवचनमपि नियुज्यैतयोरुभयोराचारणमवश्यकर्तव्यताकत्वेन प्रतिपादितम्। एतेन सहैव योगदर्शनोक्तरीत्या प्रणवजपस्य विधानमपि प्राप्यते। स्वाध्यायप्रवचनाभ्यां न कदापि प्रमदितव्यम्।[2]

ईश्वरप्रणिधानम्

प्रभुं प्रति समर्पणभावधारणमेवेश्वरप्रणिधानमित्युच्यते। किञ्चित्कार्यं विधीयते तदीश्वरे समर्पणीयम्। ईश्वरप्रणिधानस्य चरमत उपपादनस्य तात्पर्यमिदं यद्यावता साधकः कश्चिदहिंसासत्यादियमानां शौचसन्तोषादिनियमानाञ्च पूर्णतः पालनं न विधास्यति तावत्पर्यन्तं स ईश्वरकृपायाः भानं कर्तुमसमर्थो भवति। ईश्वरप्रणिधानस्य परिभाषेत्थं विद्यते-'तस्मिन् परमगुरौ परमेश्वरे सर्वकर्मणामर्पणम्। मनसा वाचा कर्मणा च कृतकर्मणां तदीश्वरं प्रति समर्पणम्।'[3] ऋग्वेदस्य वागाम्भृणी-सूक्ते उक्तमस्ति-यस्योपरीश्वरकृपा वर्तते तमीश्वरः सर्वश्रेष्ठं ब्रह्मर्षिं मेधासम्पन्नञ्च कारयतीति। यजुर्वेदस्य षोडशेऽध्याये प्रकृतेः विविधपदार्थानां सदुपयोगस्य, यथायोगसत्कारस्य, विनम्रतापूर्वकनमस्कृतेस्तथा स्तुत्यादीनां स्फुटं परिशीलनमकारि। सुप्रसिद्धनमस्कारमन्त्रोऽयं जपनीयो विद्यते -

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च।
मयस्कराय च नमः शिवाय च शिवतराय च॥[4]

उपसंहारः

यमनियमयोः नियततया निरन्तरपालनेन साधकस्य दुष्कर्माणि व्याहन्यन्ते। अहिंसासत्यास्तेयैरान्तरिकशुद्धिर्जायते। तत्पश्चात्साधकानां सांसारिकपदार्थेभ्यो विरक्तिर्जायमाना भवति। अपरिग्रहेण साधकाः विषयेभ्यः दूरीभूताः भवन्त्येवं तच्चित्तानां मलक्षालनं जायते। शौचेन शारीरिकमानसिकशुद्धिः प्राप्य स्वस्यैवं समाजस्य कल्याणं भवति। स्वाध्यायेन वेदादिशास्त्राणां तत्त्वज्ञानं तथेश्वरप्रणिधानेन समाधिः सिद्ध्यति।

---

1. स्वाध्याय मोक्षशास्त्राणामध्ययनं प्रणवजपो वा। योगदर्शनम् 2/32, 2/1(व्यासभाष्यम्)
2. स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। तैत्तिरीयोपनिषद् 1/11/1
3. ईश्वरप्रणिधानम्-तस्मिन्परमगुरौ सर्वकर्मार्पणम्। योगदर्शनम् 2/32
4. यजुर्वेदः 16/41

तदित्थभोवं कथयितुं शक्यते यद्यमनियमानां पालनेन मानवस्य समाजस्य च नूनं कल्याणं सुकरतया सम्भवति।

सहायकग्रन्थसूची

1. उपनिषत्सु योगविद्या – डॉ. रघुवीर वेदालंकार
2. भारतीय दर्शनं – डॉ. राधाकृष्णन्
3. उपनिषद्–वाङ्मये में योगविद्या – डॉ. मनुदेव बन्धु
4. ऋग्वेदस्य दार्शनिक तत्त्वानि – डॉ. गणेशदत्त शर्मा
5. पातञ्जल–योगदर्शनं – डॉ सुरेशचन्द्र शास्त्री
6. वैदिक–दर्शनं – डॉ. जयदेव वेदालंकार
7. भारतीय–दर्शनस्य रूपरेखा – प्रो. हरेन्द्र प्रसाद सिन्हा
8. शुक्लयजुर्वेदे दार्शनिक्तत्त्वानि – डॉ. सुभाषचन्द्र जसूजा
9. ईशोपनिषत् (शांकरभाष्य सहित) – गीताप्रेस, गोरखपुर

* * *

UGC- CARE Listed
जुलाई-सितम्बर, 2020

शोधप्रभा
वर्ष : 45, तृतीयोऽङ्कः

वैदिकवाङ्मये वाग्-विज्ञानम्

डॉ. बी. बी. त्रिपाठी*

सूचनम्

अखिलेऽस्मिन् विश्वे ज्ञानमीमांसायाः पारमार्थिकी परिणतिः आध्यात्मिकम् इत्यामनन्ति मनीषिणः। आर्षकालादेव च भारतराष्ट्रस्य जीवनपद्धतेः परिचिन्तनम् परमार्थपरकमेव, अतः शब्दशास्त्रीयचिन्तनमपि आध्यात्मिकमेव। अद्यापि प्रतिकूलपरिस्थतौ शब्दब्रह्मरूपः परमेश्वरः एव परिपालनाय प्रभुरिति विश्वसन्ति शब्दविदः। भारतीयचिन्तनपरम्परायाः आदिस्वरूपं वेदेष्वेव सुरक्षितं परिलक्ष्यते। वैदिकर्षीणां सार्थकशब्दा एव प्रयोक्ताः नानर्थकाः[1] इत्युद्घोषणा अद्यापि सार्थकीभवति, यतोहि निरर्थका शब्दाः फलपुष्पाभाववान् वृक्ष इव निष्प्रयोजना एव सन्ति। अथ च सच्छब्दोपासकाय वागियं सर्वान् रहस्यान् उद्घाटयति।[2] ऋग्वेदे स्वीकृताः वाण्याश्चत्वारो भेदा[3] अद्यापि भाषातत्त्वचिन्तनपराणां विदुषां व्याख्यानविषयाः भवन्ति। ऋग्वेदे तु वाचमधिकृत्य सम्पूर्णं सूक्तमस्त्येव, ब्राह्मणारण्यकोपनिषदग्रन्थेषु अपि वग्विषयकाः अतिसूक्ष्मविचाराः दृष्टिपथमायान्ति। वैयाकरणाः वाक्-तत्त्वमिदं स्फोटरूपेण प्रतिपादयन्ति।

ऋग्वेदे वाक्तत्त्वम्

यद्यपि वैदिकवाङ्मये ''स्फोट'' इति शब्दस्य नाम्नोल्लेखः नोपलभ्यते तथापि वाग्विज्ञानविद्भिः विवेचितस्य स्फोटसिद्धान्तस्य आधारभूतानि तत्त्वानि-शब्दनित्यत्वं शब्दविभुत्वं शब्दैकत्वमित्यादीनि सन्त्येव। तत्र ''एकोऽहं बहु स्यां प्रजायेय'' इति परमतत्त्वसंकल्पेन परातः श्रेणिद्वयमाविर्भवति-एका शब्दश्रेणिः, अपरा चार्थश्रेणिः। तत्र शब्दश्रेण्यां पश्यन्त्या उद्भवः, अर्थश्रेण्याञ्च प्रतिभाया आविर्भावः। शब्दार्थयोः तादात्म्यात् क्वचित् स्थलेषु द्वयोः साङ्कर्येण व्यवहारः। एवञ्च पश्यन्ती एव

---

* वरिष्ठ प्रवक्ता-संस्कृत, राजकीय-स्नाकोत्तरमहाविद्यालयः

1. स्थाणुरयं भारहारः किलाभूदधीत्यवेदं न विजानति योऽर्थम्-ऋग्वेदः
2. ऋग्वेदः- 10/6/71/4
3. चत्वारि वाक्परिमिता पदानि तानि विदुः ब्राह्मणः ये मनीषिणः गुहात्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।। ऋग्वेदः 1/164/45

स्फोट-प्रणववेदादिशब्दैस्तत्त्वविद्भिः व्यवह्रियते। ऋग्वेदस्थवाक्सूक्ते वाण्या स्वयमेव स्वशक्तेः सामर्थ्यस्य च वर्णनं कृतम्[1]। जगत्यस्मिन् सर्वाणि कार्यजातानि वाचा एव सम्पादितानि भवन्ति। देशकालयोः वक्तुश्च भेदेन अनेकरूपा वागियं पृथिव्या आरभ्य द्युलोकं यावत् प्रसरति, अथ च सर्वं विश्वमुत्पादयन्ती वायुरिव सर्वत्रगा, स्वमहिम्ना च अतिक्रान्तभूद्युलोका अप्यस्ति। जन्मना सार्थमेव कण्ठमुद्भिद्य वाक् प्रस्फुटिता, अत एव श्रवणीयत्वाच्चास्याः "शब्द" इति संज्ञा भवति। वस्तुतः विश्वस्मिन् जातमात्रस्य प्रदुर्भावस्थितिसंहारेषु आरभ्यमाणेषु सत्स्वेव यः पदार्थः सर्वप्रथमस्तित्ववान् भवति, तत्तु शब्दतत्त्वमेव। मनसि यादृशी इच्छा संकल्पो वा तदनुकूलमेव शब्दस्य आविर्भावो जायते। शब्दतत्त्वस्यास्य कालवत् सर्वत्रगतिः आकाशवच्च सर्वत्रव्याप्तिरस्ति। अखिलभुवन-मण्डलप्राङ्गणे विविधरूपेषु परिलक्षितं भवति अस्यास्तित्वम्। नदीनां कलकलनिनादेषु, निर्झरीणां निःसरणेषु, भ्रमराणां गुञ्जनेषु, परिभृतामालापेषु, सिंहानां गर्जनेषु गवां रम्भनेषु इत्यादिषु च तदेव स्वरूपं प्रकम्पितं भवति यन्मानवगदितेषु तरङ्गितमस्ति। जगदिदं वाचा एवं विकसितं वागेव च परमम्। ये जनाः वाचि न विश्वसन्ति ते स्वयमेव नश्यन्ति। वाक्सृष्टेरभावे साध्यसाध्वोः ज्ञानमपि न संभाव्यते यतो हि वागेव सर्वान् अर्थान् प्रत्याययति।

वेदेष्वभिहितं शब्दस्य सूक्ष्मरूपं वाक्तत्त्वमिदं सहस्रधा व्याप्तमस्ति।[2] ऋग्वेदे अस्य व्यापकत्वम् आद्युलोकम् आपृथिवि, अथ च यावद् ब्रह्मतत्त्वं व्याप्तं तावद् वाक्तत्त्वमपि इति वर्णितमस्ति। वेदेऽस्मिन् स्वकीयं वैशिष्ट्यमित्थं प्रतिपादितम् वाचा-

अहं रुद्रेभिः वसुभिश्चरामि अहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा विभर्मि अहमिन्द्राग्नी अहमश्विनोभा॥
अहं सोममाहनसं विभर्मि अहं त्वष्टारमुतपूषणं भगम्।
अहं दधामि द्रविणं हविष्मते सुप्राव्य यजमानाय सुन्वते॥
अहं राष्ट्री संगमनी वसूनां चिकितुसी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रं भूर्यावेशयन्तीम्[3]॥

एवमेव ब्राह्मणारण्यकन्थेषु वाक्तत्त्वस्यास्य वैशिष्ट्यं बहुशः प्रतिपदितमस्ति। यथा हि- वाग्वै ब्रह्म च सुब्रह्म च[4]। यद्वै प्रजापतेः परमस्ति वागेव तत्[5] वाग्ब्रह्म[6]। वाग्वै

---

1. ऋग्वेदः - 10/125
2. ऋग्वेदः - 10/114/8
3. ऋग्वेदः - 10/125/1-3
4. ऐतरेयब्राह्मणे 6/3
5. शतपथब्राह्मणे- 5/11228
6. गोपथब्राह्मणे- 2/10

ब्रह्म[1]। ओमित्येतदक्षरमिदं सर्वम्[2]। इत्यादिषु ब्राह्मणवाक्येषु वाक् ब्रह्मत्वेन प्रतिपादितास्ति। अथ च–

वागेवार्थं पश्यति, वागेवार्थं ब्रवीति वागेवार्थं निहितं संतनोति।
वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते॥

शब्दतत्त्वाख्यं ब्रह्म प्रथमं स्वलिङ्गं त्रिमात्रमोङ्कारम् ततोऽक्षरसमाम्नायम्, ततश्चतुरो वेदान् विरचय्य सर्वं जगदरचयत्, इदमेव च शब्दतत्त्वाख्यं ब्रह्म सूक्ष्मप्रणवरूपं परब्रह्मपदेन, त्रिमात्रमोङ्कारञ्च अपरब्रह्मपदेन, शब्दब्रह्मपदेन च व्यपदिशन्ति पुरोविदः। ब्रह्मवाचोः व्यापकतां तुलयन् ऋषिः वाचं ब्रह्मसमामेव स्थापयति। यथा च भारतीयमनीषिभिः बृहत्तमेऽर्थे ''ब्रह्म'' इत्यस्य प्रयोगः कृतः तथैव वागपि बृहत्तमपदार्थ एव। वागेव च एकमात्रं ज्ञानस्याधिष्ठानम्[3]। सम्पूर्णमपि जगदिदं वाचा एव विकसितम्, वागेव च परमं ब्रह्म[4]। उपर्युक्तेषु सर्वेषु स्थलेषु वाक्-शब्दस्य प्रयोगः सूक्ष्मतत्त्वरूपेऽर्थे एव कृतोऽस्ति। ऋग्वेदे वर्णितमस्ति यत् ये जनाः वाचि न विश्वसन्ति ते स्वयमेव नश्यन्ति[5]। देवगन्धर्व-पशु-मनुष्याः सर्वेऽपि वाण्यामेव जीवनं धारयन्ति, अथ च सर्वमपि विश्वमिदम् वाच्येव समाहितम्–

वाचं देवा उपजीवन्ति विश्वे, वाचं गन्धर्वा पशवो मनुष्याः।
वाचीमा विश्वा भुवनान्यर्पिता, सा नो हवं जुषतामिन्द्रपत्नी॥[6]

वाक्सृष्टेरभावे धर्माधर्मयोः, साध्वसाध्वोः सहृदयनिर्दययोः ज्ञानमपि न संभाव्यते, यतोहि वागेव सर्वान् एतान् प्रत्याययति।[7] महर्षियास्कस्य ''वाक् कस्माद्? वचेः इत्युक्तिरपि शब्दतत्त्वस्य स्वरूपप्रत्यायिका एव। वैदिकेषु अवैदिकेषु व सर्वेष्वेव दार्शनिकप्रस्थानेषु शब्दस्वरूपस्य, तस्योच्चारणस्य, शाब्दबोधस्य शब्दप्रमाणस्य च विस्तरेण वर्णनं कृतमस्ति। विचारस्य गतिरियं कदाचित्तु स्थूलात् सूक्ष्मं प्रति कदाचिच्च सूक्ष्मात् स्थूलं प्रति वर्तते।

वाक्तत्त्वमिंद न केवलं चेतनपदार्थेष्वेव अधिष्ठितमपितु अचेतनेष्वपि अस्य समाना एव गतिः[8]। दिव्यं वाक्तत्त्वम् ऐश्वर्यं प्रददाति कामनाश्च पूरयति। यथा च वर्णितं ऋग्वेदे–

1. जैमिनीयब्राह्मणे 2/96
2. प्रश्नोपनिषद् 5/3
3. नृसिंह- 6/2
4. सर्वेषां वेदानां वागेवायतनम्। बृहदारण्यकोपनिषद् 2/4/11
5. वाग्वैसम्राट् परमं ब्रह्म तदेव 4/1/2
6. अमतन्तवो मां त उपक्षियन्ति। ऋग्वेदः 10/125/4
7. तैत्तरीयब्राह्मणे
8. छान्दोग्योपनिषद्- 6/1/23

दैवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्यानुपसुष्टुतैतु[1]।।

एकमेव सदक्षरं नित्यं शब्दत्त्वं शास्त्रेषु प्रतिभारूपेण सर्वव्यापकम् इन्द्रमित्रवरूणाग्नि-दिव्यसुपर्णाद्यनेकरूपेणोपवर्णितमस्ति[2]।

यजुर्वेदे वाक्तत्त्वम्-

यजुर्वेदे शब्दतत्त्वं पुरुषरूपेण परिकल्प्य तस्य सर्वव्यापकत्वम् सर्वशक्तिमत्त्वञ्च ''सहस्रशीर्षा पुरुषः'' इत्यस्मिन् पुरुषसूक्ते प्रतिपादितमस्ति।[3] सर्वप्राणिसमष्टिरूपः ब्रह्माण्डदेशो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा इति। सः पुरुषः ब्रह्माण्डगोलकरूपां पृथिवीं परितः परिव्याप्य स्थितो भवति। सांख्यशास्त्रेऽपि ब्रह्मतत्त्वं पुरुषात्मना परिकल्प्य तस्य प्रकृतिविकृतिराहित्यमुपवर्णितम्[4]। इदमेव च परमतत्त्वं वैयाकरणैः स्फोटत्वेन स्वीकृतम्। शाब्दिकैः प्रतिपादितं प्रतिभातत्त्वमेव अत्र वेदे मेधातत्त्वम् (बुद्धितत्त्वम्) तदेव च समस्तदेवानां पितृगणानाञ्च उपास्यमपि-

यां मेधां देवगणाः पितरश्चोपासते।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा।।[5]

स एव परमपुरुषः सृष्टिमभिव्याप्य सर्वत्र प्रोतः, ऋतुरूपः, आत्मतत्त्वेन च सृष्टौ अनुप्रविष्टः ऋततत्त्वस्य तन्तुरिव ब्रह्माण्डे सूत्रात्मरूपेण व्यापकश्च वर्तते। तदक्षरतत्त्वस्य आत्मसाक्षात्कार एव ब्रह्मसाक्षात्कारः, सैव च ब्रह्मरूपता[6]। यजुर्वेदस्य ''इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्'' इति मन्त्रे यद् ब्रह्मशक्तिः क्षत्रशक्तिश्चैद् शक्तिद्वयं प्रतिपादितं तदेव शाब्दिकैः यथाक्रमं स्फोटः ध्वनिश्चेत्युभयरूपेणोपवर्णितम्।[7] यजुर्वेदे तदेवाक्षरतत्त्वम् सहस्रशीर्षात्मकं बहुधा इत्थं वर्णितमस्ति-

तदेवाग्निः तदादित्यस्तद्वायुस्तद् चन्द्रमा।
तदेव शक्रं तद्ब्रह्म ता आपः सः प्रजापतिः।।[8]

1. निरुक्तम् 2/22/2
2. ऋग्वेदः - 8/100/10
3. ऋग्वेदः - 10/100/11
4. इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः सुपर्णो गरुत्मान्। एकं सद्विप्राः बहुधा वदन्ति-ऋग्वेदः 1/164/46
5. सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् शु0 यजुर्वेदः 1/16/31, ऋग्वेदः 10/90
6. न प्रकृतिः न विकृतिः पुरुषः - सा0 का0 3
7. शु0 यजुर्वेदः 32/14
8. ऋतस्य तन्तु विततं विचृत्य तदपश्त् तद्भवन्तदासीत्। शु0 यजुर्वेदः 32/12

वाक्शक्तेः प्रभवादेव इन्द्रः अपशब्दोच्चारिणः पुरुषान् संहरति अथ च आत्मतत्त्वात्मनाभ्युपगममिदं वाक्तत्त्वमेव शक्तिरूपेण अपूतानि कालकवलीकरोति। विविधगुणसम्पन्नं वाक्तत्त्वमिदं समुद्रवदगाधम्, सर्वव्यापकम्, इन्द्रशक्तिसम्पन्नं प्राणापानरूपेण ऋततत्त्वस्य द्वारम्, देवमार्गरक्षकं विघ्ननिवारकञ्चाभिमतम्[1]। चिदादिधर्मयुक्तस्य वाक्तत्त्वस्यास्य द्विविधगुणसम्पन्नता वेदेऽस्मिन् स्वीकृता–

चिदसि मनासि धीरसि दक्षिणासि।
क्षत्रियासि यज्ञियासि अदितिरस्युभयतः शीर्ष्णी[2]।।

अत्र ''उभयतः शीर्ष्णी'' इत्यनेन शब्दतत्त्वस्य गुणद्वयं ध्वनिस्फोटौ एव परिगृहीतौ भवतः। यजुर्वेदे वाक्तत्त्वम् ''विश्वकर्मा'' इति पदेनापि अभिधीयते[3] अत एव च अस्य सृष्टिकर्तृत्वमपि सूचितं भवति। यथा च शतपथब्राह्मणे–

वाचा हीदं सर्वं कृतम्[4]।

कैवल्योपनिषदि वर्णितमस्ति यत् वाचि एव सर्वं प्रतिष्ठितम् वाचि उव सर्वं लीनम् वागेव चाद्वयमक्षरब्रह्म। यथा–

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्[5]।।

एतदक्षरतत्त्वमेव ब्रह्मतत्त्वम् अस्यैव च शिवेन्द्रपरमस्वराड्विष्णुप्राणकालाग्निचन्द्रादीनि अनेकानि नामानि सन्ति। त्रिकालेषु यदस्तित्ववद् भवति तदक्षरतत्त्वमेव[6]।

वैयाकरणैः यः प्रकृतिप्रत्यययोः ध्वनिस्फोटयोश्च समन्वयात्मकः सिद्धान्तः स्पष्टतया प्रतिपादितः तस्य विवेचनं पूर्वमेव यजुर्वेदस्य चत्वारिंशत्तमेऽध्याये कृतमस्ति। ये जनाः केवलमविद्याम् अर्थात् ध्वनिवादं प्रकृतिवादं भौतिकवादं कर्ममार्गञ्च उपासते ते तमोमयमार्गं प्रविशन्ति तथा च ये विद्याम् अर्थात् स्फोटवादं प्रत्ययवादम् अध्यात्मवादं ज्ञानमार्गञ्चोपसनाविषयं कुर्वन्ति ते ततोऽप्यधिकं तमोमयमार्गं प्रविशन्ति। अत एवात्र समन्वयात्मकः सिद्धातः श्रेयस्करः, समन्वयेन चानेन अविद्यया अर्थात् कर्ममार्गेण मृत्यु–बन्धनमुच्छिद्य विद्यया अर्थात् ज्ञानमार्गेण अमरत्वम् अक्षरत्वम् निवार्णञ्च प्राप्नोति[7]।। एनमेव च अविद्याविद्यात्मकं मार्गं शाब्दिकैः प्रकृतिप्रत्ययरूपेण स्फोट–ध्वनिरूपेण च प्रतिपाद्य

1. ध्वनिः स्टोटश्च शब्दानाम्। म0 भा0 1/1/60
2. यजुर्वेदः – 32/1
3. समुद्रोऽसि विश्वव्यचा अजो स्येकपादहिरसि। बुध्न्यो वागस्येन्द्रमसि सदस्यमृतस्य द्वारम्।। यजुर्वेद 5/33
4. यजुर्वेद 1/119
5. वाग्वै विश्वकर्मासि। तदेव 13/58
6. शतपथब्राह्मण 8/1/29
7. कैवल्योपनिषद् 1/19

तयोः साध्यसाधनत्वं व्यवस्थापितम्। भर्तृहरिणा प्रतिपादितं यत्–समेषां शास्त्राणां विवेचनं व्यावहारिकम्[1]।। शास्त्रन्तु तत्त्वप्रतिपादनेन सर्वथा अक्षमं, यतो हि तत्त्वमात्मसाक्षात्कारविषयः स्वानुभूतिसवेद्यश्च। जयन्तभट्टोऽपि अविद्यां विद्याया उपायत्वेनैव अङ्गीकरोति, अक्षरं वाक्तत्त्वमेव च समस्तेषु ज्ञानेषु अविनाशिरूपेणावस्थितमस्ति[2]।

अथर्ववेदे वाक्तत्त्वम्-

अथर्ववेदे वाक्तत्त्वं विद्युद्रूपेणं निरूपितमस्ति, तच्च शब्दब्रह्मतत्त्वम् वैखरी–मध्यमापश्यन्त्यात्मकम् त्रिरूपकम्, नानारूपेषु प्रतिष्ठितम्, सर्वदिक्षुव्याप्तमपि। अनेनैव च वाक्तत्त्वेन द्युलोके पृथिव्याञ्च शक्तिराधीयते, अनेनैव प्राणिषु जीवनशक्तिः किं बहुना अत्र वागियं प्रजापतिस्वरूपा, ब्रह्मतत्त्वेन सुतीक्ष्णा, ऋतस्थिता, सत्यावृत, स्वधापरिधानयुक्ता, श्रद्धापरिच्छिन्ना दीक्षया गुप्ता सुरक्षिता च वर्णितास्ति– यथा–

श्रमेण तपसा सृष्टा ब्रह्मणा वित्ततेश्रिता।
सत्येनावृता श्रिया प्रावृता यशसा परिवृता।।
स्वधया परिहिता श्रद्धया पर्यूढा दीक्षया गुप्ता।।

एव वैदिकलौकिकसर्वेष्वेव दार्शनिकप्रस्थानेषु शब्दस्वरूपस्य तस्योच्चारणस्य, शाब्दबोधस्य, शब्दप्रमणस्य च विस्तरेण विचारः कृतोऽस्ति। विचारस्य गतिरियं कदाचित् स्थूलात् सूक्ष्मं प्रति कदाचिच्च सूक्ष्मात् स्थूलं प्रति वर्तते। वैदिकवाङ्मये बहुधा विवेचितं वाग्विज्ञानम् शब्दतत्त्वचिन्तनपरैः आधुनिकैः बुधैरपि समीक्षितम्, एवं त्रिमुनिसमर्थितः विशेषतश्च महाभाष्यकारेण पतञ्जलिना सुव्यवस्थापितः स्फोटसिद्धान्तः (वाग्विज्ञानम्) वाक्यपदीये स्वतन्त्रदर्शनरूपतामासादयति। अस्मादेव च शब्दतत्त्वात् सर्वं चिदचिदात्मकं जगत् प्रादुर्बभूव इति विस्तारयति वाक्यपदीयकारः अतः वैदिकर्षिभिः विवेचितं वाग्विज्ञानमद्यापि विदुषां विचारपथम् प्रथयति।

* * *

1. तदेव 1/8–9
2. यजुर्वेद 40/12–14

UGC- CARE Listed
जुलाई-सितम्बर, 2020
शोधप्रभा
वर्ष : 45, तृतीयोऽङ्कः

बौद्धधर्मे ध्यानस्य स्वरूपम्

प्रो. मारकण्डेयनाथ तिवारी*

बौद्धधर्मे ध्यानस्यातीवमहनीयं स्थानमस्ति। ध्यानमपहाय साधनासिद्धिर्भवितुं नैव शक्याऽस्ति। बौद्धसाधनायां ध्यानेन सहैव साधना-विमुत्ति-समथ-भावना-विसुद्धि-विपस्सना-अधिचित्त-योग-कम्मट्ठान-पधान-निमित्त-आरम्मणप्रभृतीनां शब्दानामुपयोगो विश्लेषणञ्च कृतमऽस्ति। एषु ध्यानं समाधिश्चेति प्राधान्येन पारिभाषिकशब्दरूपेण मन्येते। वस्तुतो ध्यानस्य क्षेत्रमेतादृग् विस्तृतमस्ति यत्तस्मिन् समाधिविषयाण्यप्यन्तर्भूतानि भवन्ति।

ध्यानस्यार्थः:- ध्यानस्य (पालि-ज्ञानस्स) तात्पर्यं चिन्तनमस्ति। बुद्धघोषेणास्य व्युत्पत्तिरेवम्प्रकारेण कृताऽस्ति-'झायत्ति उपनिज्झायती ति झानं' अथवा 'इमिना योगिनो झायन्ती ति झानं'। अर्थात्कमप्येकविषयमधिकृत्य विशिष्टचिन्तनम्। अस्यापरोऽप्यर्थः कृतोऽस्ति- 'पञ्चनीकधम्मे झायती ति झानं' अथवा 'पञ्चनीकधम्मे दहति, गोचरं वा चिन्तेती ति अत्थे'। अत्राकुशलकर्मणां दहनमपि ध्यानस्यार्थरूपेण निरूपितमस्ति[1]।

समाधेरर्थः:- समाधिशब्दस्य (सम्+आ+धा) प्रयोगः चित्तस्यैकाग्रतायाः (चित्तस्स एकग्गता) सन्दर्भे कृतोऽस्ति[2]। परिभाषायामस्यामाचार्यबुद्धघोषेण कुशलशब्दोऽपि सन्नियोजितोऽस्ति- 'कुसलचित्तेकग्गता'। अत्र 'सम्मा समाधीति यथा समाधि, कुसलसमाधि'[3] इत्येवमभिधाय बुद्धघोषेणेदं स्पष्टयितुं प्रयत्नः कृतोऽस्ति यत्समाधेः सम्बन्धः शुभभावानामेकाग्रीकरणेनैवास्ति।

समाधिध्यानयोरुपर्युक्तव्याख्यानेन निष्कर्षममुमाप्तुं प्रभवामो यद् यत्र समाधिः केवलं कुशल-(शुभ्र) कर्मभिरेव सम्बद्धाऽस्ति, तत्र ध्यानं हि प्रकारद्वयात्मकान् कुशलाकुशलान् (शुभाशुभान्) भावान् गृह्णाति। अतः समाध्यपेक्षया ध्यानस्य क्षेत्रं बृहत्तरमस्ति।

* आचार्यः, सांख्ययोगविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली-110016

1. समन्तपासादिका, पृ. 145-146
2. धम्ससंगणि, पृ. 10
3. विसुद्धिमग्ग

ध्यानभेदास्तेषामाशयश्च - बौद्धधर्मे मूलतो ध्यानस्य भेदद्वयं निरूपितमस्ति तत्र प्रथमः आलम्बनमाधृत्य चिन्तनात्मकः 'आरम्भण उपनिज्झान' इति, द्वितीयश्च लक्षणमाधृत्य चिन्तनात्मकः 'लक्खण उपनिज्झान' इति[1]। 'आरम्भण उपनिज्झान' इत्यस्याष्टौ भेदाः सन्ति- रूपावचराश्चत्वारः, अरूपावचराश्च चत्वारः। एते समायत्तिनाम्नाऽप्यभिधीयन्ते। उपचारो हि समाधेः प्राम्भिकी भूमिकाऽस्ति, शेषाश्च तस्याः विकसितावस्थाः सन्ति।

'लक्खण उपनिज्झान' इति तु भेदत्रयात्मकोऽस्ति- 1. विपस्सना, 2. मग्गं, 3. फलम्। साधारणतस्त्रिपिटके विपस्सनायाः प्रयोगः समयेन सह प्राप्यते- 'समयो च विपस्सना'[2]। अत्र हि विषयवस्तुलक्षणानां विचारोऽभिधीयते, मार्गे तस्य कार्यं सम्पूर्तिं याति। तस्याः निष्पत्तिश्च फले भवति। अमुमेव लोकोत्तरध्यान नाम्नाऽभिधीयन्ते तथा च निर्वाणस्य विशिष्टरूपमपि मन्यन्ते।[3] विपस्सनायां सप्तप्रकारिका विशुद्धिरप्याप्यतेशीलविशुद्धिः, चित्तविशुद्धिः, दृष्टिविशुद्धिः, कांक्षावतरणविशुद्धिः, मार्गामार्गज्ञानदर्शनविशुद्धिः, पतिपदाज्ञानदर्शनविशुद्धिः, ज्ञानदर्शनविशुद्धिश्च।[4]

ध्यानस्य भेदभेदाङ्गविचारो विवादास्पदविषयोऽस्ति। सुत्तपिटके ध्यानस्य चत्वारो भेदाः प्राप्यन्ते, अभिधम्मपिटके हि तत्पञ्चभागेषु विभक्तमस्ति। रूपालम्बनोपरि चित्तस्येमाः विविधा अवस्थाः सन्ति, या हि वितर्क-विचार-प्रीति-सुख-समाधि- नाम्नाऽभिहिताः सन्ति।

वितर्कस्यार्थः - तर्कवितर्कसम्पादनम्, चित्तस्याभिनिरोपणम्, सम्यक्सङ्कल्प-सम्पादनञ्च। आरम्भणे चित्तस्यारोपणमस्य मुख्यो विषयोऽस्ति। यथा हि कस्यापि भूपतेः सान्निध्यावाप्त्यर्थं तस्य कस्यापि निकटसम्बन्धिनः उपयोगो भवति, तथैव ध्याने आरम्भणस्यापि तत्प्रकारक एवोपयोगो भवति।[5]

आलम्बनविषयकचिन्तनं हि विचार एवास्ति। चित्तं तु सततं विचारविमर्शपूर्वकं विषयसामीप्येऽनुमज्जनरतस्तिष्ठति, अथ च वितर्कमाध्यमेनारूढान् सम्प्रयुक्तधर्मानालम्बनपार्श्वे संस्थाप्य तत्पार्श्वे एव परिभ्रमति। अर्थादालम्बने चित्तस्य संयोग एव वितर्कोऽस्ति तथा च तस्य तत्रैव स्थैर्यं विचारोऽस्ति वितर्कस्योद्भूतिर्विचारात्पूर्वमेव भवति तथा च सः विचारापेक्षया स्थूलोऽप्यस्ति। परिभ्रमणं हि विचारस्य स्वभावोऽस्ति, तस्य सूक्ष्मत्वात्। यथा हि खगानां वियति सञ्चरणं वितर्कोऽस्ति, तेषामाकाशे पक्षप्रसारणञ्च विचारोऽस्ति।

1. दीघनिकाय, 3. पृ. 276, मज्झिम, 1 पृ. 494, संयुत्त, पृ. 360 इत्यादि।
2. सद्धम्मपकासिनी, पृ. 196
3. अभिधम्मत्थ संग्रह, कम्मट्ठान संग्रह।
4. धम्मसंगणि, पृ. 19, अट्ठसलिनी, पृ. 94
5. अट्ठसालिनी, पृ. 94

प्रीतेरर्थः प्रफुल्लितत्वं भवति।[1] प्रीतेरुद्भवे सति चित्तं विकसितकमलपुष्पवत्प्रसीदति। प्रीतिरियं पञ्चप्रकारिकाऽस्तिक्षुद्रिका प्रीतिः, क्षणिका प्रीतिः, अवक्रान्तिका प्रीतिः, उद्वेगा प्रीतिः, स्फुरणा प्रीतिश्च।[2]

सुखमप्येकस्य मानसिकानन्दस्यानुभूतेरभिधानमस्ति। तस्मिन् आनन्दे सर्वप्रकारिकाः मानसिक-शारीरिकबाधाः प्रसर्पन्ति। विषयस्यास्योपलब्धितो जायमानतृप्तिमाध्यमेन प्रीतिः सञ्जाते, प्रीत्याऽनया सुखस्योद्भूतिर्भवति।

कुशलचित्तस्यैकाग्रता एव समाधिरस्ति। एकाग्रता, समाधिरथवा उपेक्षाऽप्येषैवाभि-धीयते। कुशलचित्तस्यात्र सम्बन्धो रूपावचरारूपावचरलोकोत्तर-चित्तेष्वेवास्ति। कुशलचित्तस्यालम्बनः 'कम्मट्ठान'-नाम्नाऽप्यभिधीयते। कम्मट्ठानानां (कर्मस्थानानां) संख्या बौद्धधर्मे चत्वारिंशत्संख्याका कथिताऽस्ति, यथा- दस कृत्स्नाः, दसाशुभाः, दसानुस्मृतयः, चत्वारो ब्रह्मविहाराः, संज्ञा, व्यवस्थानम्, चतुर्विधाः आरूप्याश्च। एषां प्राप्तौ पञ्चबाधकतत्त्वानि सन्ति- कामच्छन्द-व्यापद-थनमिद्ध-कुक्कुच्च विचिकिच्छाभिधानि।[3] एषामुपशमः क्रमशः समाधि-प्रीति-वितर्क-सुख-विचारैर्भवति।[4]

नीवरणानामुपशमनार्थं ध्यानस्यावाप्त्यर्थञ्च साधकश्चित्तमेकस्मिन् नियतारम्भणे केन्द्रीकरोति। स विषयः 'परिकम्मनिमित्त'-नाम्नाऽभिहितोऽस्ति तथा च स अभ्यासः 'परिकम्मसमाधि' नाम्नाऽभिधीयते। अभ्यासबलेन परिकम्मनिमित्तमपहायापि केवलमन्तर्मनसि केवलमन्तर्मनसि प्रतिष्ठापितायां तत्प्रतिकृतौ चित्तमेकाग्रीक्रियते। अवस्थामिमामुग्गहनिमित्तनाम्नाऽभिधीयन्ते बौद्धाः। निमित्तस्यानुचिन्तनानुमनने जाते सति नीवरणानां क्लेशानाञ्चोपशमनं सञ्जायते, उपचारसमाधिना च चित्तस्यैकाग्र्यं सञ्जायते। तदैव प्रतिभागनिमित्तस्योद्भतिर्भवति। उग्गहनिमित्त-प्रतिभागनिमित्तयोरिदमन्तरमस्ति यदुग्गहनिमित्ते कसिणदोषस्य स्थितिः सततरूपेण भवति, प्रतिभागनिमित्तं हि दर्पणवत् सुपरिशुद्धं भवति।

बौद्धधर्मे समाधिर्भेदद्वयात्मिकाऽस्ति उपचारसमाधिरर्पणासमाधिश्च। चित्तस्यै-काग्रीकरणार्थं साधनरूपेणापीमेऽभिमन्यते। उपचारे नीवरणानां प्रहाणं सञ्जायते, अप्रणायाञ्च ध्यानस्यावाप्तिर्भवति। उपचारध्याने चित्तं यदा कदा निमित्तस्यालम्बनं करोति, यदा कदा च भवाङ्गेऽवतरति; परन्तु अर्पणाध्याने हि स्थितिरियमपसरति। तत्प्राप्तौ सत्यां चित्तस्यैकाग्रतायां स्थिरताऽऽयाति। एतदर्थं साधकस्य कृते आवास-गोचर-संलाप-व्यक्ति-

1. धम्मसंगणि, पृ. 22
2. अट्ठसालिनी, पृ. 95
3. अभिधम्मत्थ संगह, नवनीत टीका
4. नीवरणानि हि झानंगपच्चनीकानि तेसं झानंगा नेव पटिपक्खानि। विद्धंसकानि विघातकानी ति वुत्तं होती। तथाहि समाधि कामच्छन्दस्स पटिपक्खो, पीति व्यापादस्स, वितक्को थनमिद्धस्स सुखं उद्धच्चकुक्कुच्चस्स विचारो विचिकच्छाया ति पेटके वुतं, विसुद्धिमग्ग, पृ. 95

भोजन-ऋतु-ईर्यापथाभिधानां सप्तसंख्याकानां विपरीताचाराणां त्यागः करणीयो भवति।

आवासो गोचरो भस्सं पुग्गलो भोजनं उतु।
इरियापथो ति सते असप्याये विवच्चये ॥[1]

अर्पणाध्यानस्य संस्कर्त्ता परिकर्माभिधः (परिकरोति अप्पनं अभिसंकरोतीति परिकम्मनं) भवति। परिकर्मे सञ्जाते सति चित्तमस्माकं ध्यानं प्रति प्रवृत्तं भवति। अर्पणाध्यानानन्तरमुपचारानुलोमगोत्रभूप्रभृतीनामुद्भूतिर्भवति, ततश्च चित्तस्यैकाग्र्यं सञ्जायते।

1. रूपावचरध्यानम्

प्रथमध्यानम् - यदा हि चित्तं रूपं ध्यायति, तदा तं रूपावचरचित्तनाम्नाऽ-भिधीयते। अवस्थायामस्यां ध्यानस्य बाधकतत्त्वानां नीवरणानां प्रहाणं भवति तथा च वितर्क-प्रीति-सुखोपेक्षात्मका ध्यानस्य पञ्चाङ्गाश्चित्तस्य स्थितिमालम्बनोपरि स्थिरीकुर्वन्ति। द्वितीयध्यानरूपेणाप्ययमेवाभिधीयते-

'विविच्चेव कामेहि विविच्च अकुशलेहि धम्मेहि सवितक्कं सविचारं विवेकजं पीतिसुखं पठमं ज्ञानं उपसंपज्ज विहरति'।[2] नीवरणैरकुशलधर्मभिश्च सुदूरं स्थितिं विधाय चित्तं वितर्कमाध्यमेन रूपालम्बनोपरि स्वकीयां स्थितिं स्थिरीकरोति। विचारेण सः अनुसञ्चरणं विदधाति। प्रीत्या तृप्तिं सुखेन च हर्षातिरेकमुत्पादयति। समेषामेषाम्माध्यमेन सः चपलतातो दूरमेव स्वं स्थापयाति। अत्रैवेदं चित्तं कायप्रश्रब्धिं चित्तप्रश्रब्धिञ्च सम्पूरयति तथा च क्षणिकसमाधिमुपचारसमाधिमर्पणासमाधिञ्चाप्नोति। ध्यानस्यास्यां प्रथमावस्थायां साधकः आवर्जन-समाधिष्ठान-व्युत्थान-प्रत्यवेक्षणात्मकपञ्चप्रकारैर्वश्याः समभ्यासं विदधाति। एभिः पञ्चाङ्गैः साधकश्चित्तं पूर्वोक्तपञ्चाङ्गेषु सततरूपेण संस्थापनार्थं शक्तिमेकत्रीकरोति।

द्वितीयध्यानम् - प्रथमरूपावचरध्यानस्य सम्प्राप्त्यनन्तरं साधकः स्मृत्या सम्प्रजन्येन च संयुतो भूत्वा ध्यानाङ्गानां प्रत्यवेक्षणं विदधाति। वितर्कविचारादयस्तं स्थूलरूपेण प्रतीयन्ते तथा च प्रीतिसुखैकाग्रताः शान्तिदायिन्यः प्रतीयन्ते। अवस्थायामस्यां पृथ्वीकसिणोपर्यनुचिन्तनद्वारा भवाङ्गं कर्त्तयित्त्वा मनोद्वारावर्जनमुद्भवति। तस्मिन्नेव पृथ्वीकसिणे चत्वारः पञ्च वा जवना उत्पद्यन्ते। केवलमन्तिमजवनो रूपावचरस्य भवति, शोषश्च कामावचरस्य भवन्ति। ध्यानस्यास्यां द्वितीयावस्थायां वितर्कस्य विचाराणाञ्चोपशमो जायते। अत एवेदं वितर्कस्य विचाराणाञ्चोपशमेन आन्तरिकप्रसादचित्तैकाग्रतायुतसमाधिना जायमानप्रीतिसुखात्मकं द्वितीयध्यानमभिधीयते। प्रीति-सुखैकाग्रताः अस्य प्रमुखाणि त्रीण्यङ्गानि सन्ति। ध्यानममुं सम्प्रसादनमर्थात् श्रद्धाप्रसादयुतमेकोदिभावं कथयन्ति बौद्धाः,

1. विसुद्धिमग्ग, पृथ्वीकसिण निर्देश
2. अभिधम्मत्थसंग्रहो पृ. 16

यथा–

'वितक्कविचारानं वूपसमा अज्झत्तं सम्पासनं चेतसो एकोदिभावं अवितक्कं अविचारं समाधिजं पीतिसुखं दुतियं झानं उपसम्पज्ज विहरति'।[1]

वितर्कस्य विचाराणाञ्चाभावे सञ्जाते सति जायमानं सम्प्रसादनमेकोदिभावश्चास्य ध्यानस्य वैशिष्ट्यमस्ति।

तृतीयध्यानम्– साधकस्य ध्यानावस्था यदा विशुद्धतया सञ्जायते, तदानीं तत्कृते द्वितीयध्यानमपि दोषग्रस्तमिव प्रतीयते। वितर्क-विचारादयः प्राथमिकध्यानद्वय एवोपशमं यान्ति। यतो हि प्रीतिस्तृष्णासहगता भवत्यतस्साऽपि परित्यज्यते। अत्र प्रीतिः स्थूला भवति, सुखैकाग्रता च सूक्ष्मा भवति। प्रीतिरूपस्थूलाङ्गस्य प्रहाणार्थं योगी पृथ्वीकसिणं पुनः पुनरचुचिन्तयति तथा च तस्मिन्नेवालम्बने चत्वारि पञ्च वा जवनानि धावयन्ते, येषामन्ते तृतीयध्यानात्मक एको रूपावचरः, शेषाश्च कामावचरा भवन्ति। ध्यानेऽत्र प्रीतिस्तु नैव भवति, केवलं सुखमेकाग्रता चावशिष्येते। उपेक्षा-स्मृति-सम्प्रजन्याः अस्य परिष्काररूपेण सन्ति, यथा–

'पीतितया च विरागा उपेक्खको च विहरति, सतो च सम्पजानो सुखञ्च कायेन पटिसंवेदेति, यं तं अरिया आचक्खन्ति, उपेक्खको सति-मा सुखविहारी ति ततियं ज्ञानं उपसंपज्ज विहरति।

साधको ध्यानस्यास्य सम्प्राप्त्यनन्तरमुपेक्षाभावधारको भवति, समभवश्चापि जायते। उपेक्षेयं दसप्रकारिकाऽस्ति-षडङ्गोपेक्षा, ब्रह्मविहारोपेक्षा, बोध्यङ्गोपेक्षा, वीर्योपेक्षा, संस्कारोपेक्षा, वेदनोपेक्षा, विपश्यनोपेक्षा, तत्रमाध्यस्थोपेक्षा, ध्यानोपेक्षा, परिशुद्ध्युपेक्षा च।

क्षीणाश्रवभिक्षोः साधकस्य वा वृत्तिरुदासीना नैव भवति। सः स्मृतियुतः सम्प्रजन्ययुतश्च सम्भूयोपेक्षकः सञ्जायते। सर्वप्रथमं षडिन्द्रियाणां प्रियाप्रियालम्बनानां प्रति परिशुद्धरूपेणोपेक्षाभावं स्थापयति। इयमेव षडङ्गोपेक्षाऽस्ति प्राणिषु मध्यस्थभावस्थापनं ब्रह्मविहारोपेक्षाऽस्ति। स्वकीयसम्प्रयुक्तधर्मान् प्रति मध्यस्थभावस्थापनं बोध्यङ्गोपेक्षाऽस्ति। अत्यधिकं शिथिलभावविरहितञ्चोपेक्षासदनं वीर्योपेक्षाऽस्ति। नीवरणानां प्रहाणे सञ्जाते सति संस्काराणां ग्रहणे उपेक्षा संस्कारोपेक्षाऽस्ति। संस्कारोपेक्षेयं समाधितो जायमानाऽष्ट-प्रकारिका (ध्यानचतुष्टयमरूप्यचतुष्टयञ्च), विपश्यनातो जायमाना दसप्रकारिका (मार्गचतुष्टयं फलचतुष्टयं शून्यताविहारमनिमित्तकविहारञ्च) अस्ति। सुखदुःखयोरुपेक्षा वेदनोपेक्षाऽस्ति। पञ्चस्कन्धप्रभृतिविषयेषूपेक्षा विपश्यनोपेक्षाऽस्ति। छन्दोऽधिमोक्षप्रभृति-धर्मेषूपेक्षावृत्तिस्तत्रमध्यस्थोपेक्षाऽस्ति। तृतीयध्यानेऽग्रसुखेषूपेक्षाभावो ध्यानोपेक्षाऽस्ति। नीवरण-वितर्कप्रभृतिविरुद्ध-धर्माणामुपशमं प्रत्यप्युपेक्षाभावः परिशुद्ध्युपेक्षाऽस्ति।

1. विसुद्धिमग्ग : दी नि 1, पृ. 65-66

उपेक्षायाः प्रकारेष्वेषु षडङ्गोपेक्षा, ब्रह्मविहारोपेक्षा, बोध्यङ्गोपेक्षा, मध्यस्थोपेक्षा, ध्यानोपेक्षा, परिशुद्ध्युपेक्षा चार्थत एकैव सन्ति, तत्र केवलमवस्थाया भेदोऽस्ति। संस्कारोपेक्षा विपश्यनोपेक्षा चाप्येतादृश्यौ एव स्तः। अत्र ध्यानोपेक्षाऽधिकमभिप्रेताऽस्ति।

चतुर्थध्यानम्- ध्यातुस्तुरीयावस्थायां तृतीयध्यानमपि सदोषं दरीदृश्यते। अत्रापि पञ्चविधवश्याः अभ्यासः क्रियते। तस्मिन् समये साधको विचारयति यत्तृतीयध्यानस्य सुखं स्थूलमस्ति, अन्ये भागाश्च दुर्बलाः सन्ति, अथ च चतुर्थध्यानं शान्तिदायकमस्ति, उपेक्षा-वेदना-चित्तैकाग्रताः शान्तिकराः सन्ति। एतद्विचारानन्तरं सः स्थूलाङ्गानां प्रहाणार्थं शान्ताङ्गानामवाप्त्यर्थञ्च पृथ्वीकसिणमनुचिन्त्य तदालम्बनं विधाय मनोद्वारावर्जनमुत्पादयति। ततश्च तस्मिन्नालम्बने चतस्त्रः पञ्च वा जवनाः धावन्ति, येषामन्ते एको रूपावचरश्चतुर्थध्यानस्य वसति। विसुद्धिमग्ने चतुर्थध्यानस्य लक्षणमित्थं प्रतिपादितमस्ति- 'सुखस्स च पहाना दुक्खस्स च पहाना पुब्बेव सोमनस्स दोमनस्सानं अत्थङ्गमा अदुक्खमसुखं उपेक्खासतिपारिसुद्धिं चतुत्थं ज्ञानं उपसंपज्ज विहरति'।

चतुर्थध्यानस्य सम्प्राप्तेः पूर्वमेव कायिकं सुखं दुःखञ्च विनश्यति, सौमनस्यं दौर्मनस्यञ्च सम्पूर्तिं याति। सौमनस्यं हि चतुर्थध्यानोपचारक्षणे प्रहीणं भवति तथा च दुःखं दौर्मनस्यं सुखञ्च प्रथमोपचारक्षणे प्रहीणं भवति।

विविधावर्जनानां प्रथमध्यानोपचारे सुशान्तानां दुःखेन्द्रियाणामुत्पत्तिदशमसका-दिकीटादीनां दंशनेन सम्भवति, न हि अर्पणया। द्वितीयध्यानोपचारक्षणे यद्यपि चैतसिकदुःखस्य प्रहाणं भवति, तथापि वितर्कविचारयोः कारणेन चित्तस्योपघातः सम्भवति; परन्त्वर्पणायां वितर्कविचारयोरभावात्तस्य काऽपि सम्भावना नास्ति। एवमेव तृतीयध्यानोपचारक्षणे यद्यपि कायिकसुखस्य निरोधो भवति, तथापि सुखप्रतययरूप्रीति-साहचर्यात् कायिकसुखस्योत्पत्तिः सम्भवाऽस्ति किन्त्वर्पणायां प्रीतेरत्यन्तनिरोधादस्याः सम्भावना नैव स्थास्यति। एवमेव चतुर्थध्यानस्योपचारक्षणेऽर्पणाप्राप्तोपेक्षाया अभावात्तथा सुष्ठुरूपेण चैतसिकसुखातिक्रमाभावाच्चैतसिकसुखस्योत्पत्तिः सम्भवति; परन्त्वर्पणायामस्याः सम्भवति; परन्त्वर्पणायामस्याः सम्भावना नास्ति।[1]

चतुर्थध्यानमिदमदुःखरूपमसुखरूपञ्चास्ति। उपेक्षारूपेणापीदमाभिधातुं शक्यते। उपेक्षयाऽनया स्मृतौ परिशुद्धिरायाति। यद्यपि प्रथमध्यानत्रयेष्वप्यस्या उपेक्षायाः स्थितिर्भवति, तथापि परिशुद्धावस्थायां तस्याः स्थितिर्नैव भवति।

एवञ्च प्रथमध्याने सुत्तपरम्परादृशा वितर्क-विचार-प्रीति-सुखैकाग्रताभिधानि पञ्चाङ्गानि विद्यन्ते। द्वितीयध्याने वितर्कविचारयोः समाप्तिर्भवति। तृतीयध्याने प्रीतिर्नैव भवति तथा च चतुर्थध्याने सुखाभावात्केवलमेकाग्रतैवावशिष्यते।

1. बौद्धधर्म दर्शन, पृ. 74; विसुद्धिमग्ग (हिन्दी) भाग-1, पृ. 14

ध्यानभेदस्यैकान्यपरम्परा- बौद्धसाहित्ये ध्यानस्य भेदानामेकाऽन्यपरम्पराऽपि दृष्टिपथमायाति। अभिधर्मानुसारं ध्यानस्य पञ्चभेदा भवति। तस्य प्रथमो भेदो ध्यानस्य भेदचतुष्टयपरम्परातः पृथक् नैवास्ति। ध्यानचतुष्टयपरम्परायाः द्वितीयं ध्यानं ध्यानपञ्चकपरम्परायां द्वितीय-तृतीयभेदयोर्विभज्यते। एवञ्च ध्यानचुष्टयस्य तृतीयं चतुर्थञ्च ध्यानं ध्यानपञ्चकस्य चतुर्थं पञ्चमं च ध्यानमस्ति।

2. अरूपध्यानम्

रूपावचरध्यानस्य तुरीयाथवा पञ्चमध्यानस्यावस्थानन्तरं यद्यपि निर्वाणस्य साक्षात्कारः सम्भवति, तथापि साधको निर्वाणनिराकारालम्बनोरि ध्यानं करोति, इदमेवारूपावचरध्यानमस्ति। अस्य चतस्रोऽवस्थाः भवन्ति। प्रथमावस्थायां साधकोऽनन्तमाकाशं विचारयति। द्वितीयावस्थायामनन्ताकाशस्य स्थूला प्रतीतिर्भवति तथा च विज्ञानस्य सूक्ष्मा प्रतीतिः सञ्जायते। अरूपध्यानस्य विज्ञानायतनरूपेयं द्वितीयावस्थाऽस्ति। तृतीयावस्थायामाकिञ्चन्यायतनोपरि तथा च तुरीयावस्थायां नेवसञ्ञानासञ्ञायतनोपरि ध्यानं क्रियते। साधकोऽत्र क्रमशः पूर्वतरालम्बनं स्थूलं पश्चात्तरालम्बनञ्च सूक्ष्ममभिमन्यते।

3. लोकोत्तरध्यानम्

उपर्युक्तरीत्या रूपध्यानारूपध्यानयोर्माध्यमेन साधकः परिशुद्धसमाधिमधिगच्छति। निर्वाणरूपस्यास्य फलस्य लोकोत्तरध्यानेनोपलब्धिः क्रियते। सन्दर्भेऽस्मिन् लोकोत्तरभूमे-रथवाऽपरियापन्नस्य कथनं कृतमस्ति।

रूपावचरध्यानेऽरूपावचरध्याने चापि संयोजनबीजानां सद्भावः सम्भावितो भवति, लोकोत्तरध्याने तस्य प्रहाणं क्रियते। सत्कायदृष्टि-विचिकित्सा-शीलव्रतपरामर्श-कामच्छन्द-प्रतिघ-रूपेरागारूपराग-मानौद्धत्याविद्याभिधानि दससंख्याकानि संयोजनानि सन्ति। यद्यपि तेषां प्रहाणं नीवरणरूपेण भवति, तथापि यानि बीजानि अवशिष्टानि जायन्ते, तेषां विनाशो लोकोत्तरध्यानेन सम्पद्यते। लोकोत्तरध्याने एव क्रमशः स्रोतापत्ति-सकृदागाम्यनागाम्यर्हदवस्थाः प्राप्यन्ते। लोकोत्तरभूमौ चित्तस्याष्टस्ववस्थासु प्रत्येकावस्थायां पञ्चविधरूपध्यानस्याभ्यासं साधकः करोति। एवञ्च लोकोत्तरचित्तस्य चत्वारिंशद्भेदाः सञ्जायन्ते। लोकोत्तरध्यानमेव परिशुद्धध्यानमभिधीयते।

बौद्ध-जैनसम्मतध्यानस्वरूपस्य तुलना- बौद्धधर्मोपवर्णितोक्तध्यानस्वरूप-विचारणेनेदं स्पष्टमस्ति यद् बौद्धधर्मे ध्यानं निर्वाणसाधकमात्रमेवाभिमन्यते। जैनधर्मेऽपि यद्यपि ध्यानस्य आर्त-रौद्र-धर्म-शुक्लध्यानाख्याश्चत्वारो भेदाः कृताः सन्ति; परन्त्वेते संसारस्य निर्वाणस्य चापि साधकाः सन्ति। प्रथमे द्वे ध्याने संसारस्य परिवर्धके स्तः, अन्तिमे च द्वे ध्याने निर्वाणसाधके स्तः। धर्मध्यानं शुभध्यानमस्ति, शुक्लध्यानञ्च शुद्धध्यानमस्ति।

पृथक्त्ववितर्क–एकत्ववितर्क–सूक्ष्मक्रियाप्रतिपाति–व्युपरतक्रियानिवतिरूपेण शुक्लध्यानं चतुर्विधमस्ति। प्रथमं पृथक्त्ववितर्कध्यानं मन–वन–कायेति योगत्रयधारकेणष्टमगुणस्थानपर्यन्तस्थजीवानां भवति। द्वितीयमेकत्ववितर्कध्यानं त्रिष्वप्येकस्य कस्यापि योगधारकस्य द्वादशगुणस्थानवर्तिजीवस्य भवति। तृतीयं सूक्ष्मक्रियाप्रतिपातिध्यानं केवलं काययोगधारकस्य त्रयोदशगुणस्थानस्यान्तिमे भागे भवति। तुरीयञ्च व्युपरतक्रियानिवर्तिध्यानं योगरहितजीवानां चतुर्दशगुणस्थाने भवति।

तत्त्वार्थसूत्रकारेणाचार्योमास्वामिना वितर्कं श्रुतज्ञानमिति प्रकथितमस्ति[1], अर्थव्यञ्जनस्य योगस्य च परिवर्तनं विचारमिति प्रतिपादितमस्ति।[2] प्रथमं पृथक्त्ववितर्काख्यं शुक्लध्यानं वितर्कविचारयुतं भवति, द्वितीयञ्चैकत्ववितर्कं विचाररहितं वितर्कसहितञ्च मणिवदचलमस्ति। प्रथमभेदात्मकशुक्लध्यानं प्रतिपात्यप्रतिपातीत्युभयं भवति। बौद्धधर्मे वितर्कापेक्षया विचारस्य विषयः सूक्ष्मोऽभिमन्यते। तस्य वृत्तिरपि शान्ताभिमन्यते। प्रथमशुक्लध्याने वितर्कविचारयोर्द्वयोरपि ध्यानं क्रियते। द्वितीयशुक्लध्याने विचारो नैवास्ति। बौद्धधर्मे सर्वाणि ध्यानानि प्रतिपातिरूपेणाभिहितानि सन्ति, परञ्च जैनधर्मे प्रथमध्यानमेव प्रतिपात्यप्रतिपातीत्युभयरूपेण प्रतिपादितमस्ति।

एवञ्च श्रमणसंस्कृतेर्बौद्धधर्म–जैनधर्मेति शाखयोः साधनाक्षेत्रे ध्यानस्य कृते पर्याप्तरूपेण महत्त्वं प्रतिपादितमस्ति। जैनधर्मे ध्यानं जगतो निर्वाणस्य चोभयोः क्षेत्रे नियोजितमस्ति; परन्तु बौद्धधर्मे तन्निर्वाणप्राप्तिपर्यन्तमेव सीमितमस्ति। एतदतिरिच्य समष्टिरूपेण कथितुं शक्यते यदुभयसाधनयोर्ध्यानस्य परिपूर्णोपयोगिताऽस्ति, अपि च तस्य विस्तृतं विश्लेषणमपि कृतमस्तीत्यलं विस्तरेणेति शम् ।।

* * *

1. वितर्कः श्रुतम्, तत्वार्थसूत्र, 9–43
2. वीचारोऽर्थव्यंजनयोगसंक्रान्तिः, वहि, 9–44

UGC- CARE Listed
जुलाई-सितम्बर, 2020
शोधप्रभा
वर्ष : 45, तृतीयोऽङ्कः

विष्णुपुराणे पुरुषः, प्रकृति एवं सृष्टितत्त्वम्

डॉ. सायनिका गोस्वामी*

सूचनम्

प्राचीनपुराणानां मध्ये विष्णुपुराणमन्यतमम्। सामाजिकदृष्ट्या धार्मिकदृष्ट्या च विष्णु-पुराणस्य माहात्म्यं सर्वैः स्वीक्रियते। पुराणस्य पञ्चलक्षणानि अस्मिन्नेव पुराणे सम्पूर्णतया उपलभ्यन्ते। विष्णुपुराणं षट्सु भागेषु विभज्यते। तत्र वक्ता पराशरः श्रोता मैत्रेयश्च। प्रथमांशे तत्र सर्ग-प्रतिसर्गयोः व्याख्यानं भवति। तत्र प्रथमांशस्य द्वितीये-पञ्चमे-अध्याये च सृष्टितत्त्वं विचार्यते।

उल्लेखनीयं यद्दार्शनिक-विषयाणां महत्वपूर्णसमावेशेन पुराणसाहित्यमतिशोभनं वर्तते। विष्णुपुराणे सर्ग-प्रतिसर्गप्रतिपादनावसरे सृष्टितत्त्वविवरणे प्रकृति-पुरुषयोर्समावेशः दार्शनिकमाहात्म्यमेव उत्कर्षयति। अधुना सर्वत्र सृष्टितत्त्वविवरणे प्रकृति- पुरुषयोर्समावेशः अस्य दार्शनिकमहात्म्यमेव उत्कर्षयति। अधुना सर्वत्र सृष्टिरहस्यस्य गुरुत्वमुपलब्धम्। विष्णु-पुराणे सांख्यादिकृतायाः सृष्टिव्याख्यायाः प्रभावेन तथा भगवतः विष्णोः सर्वोन्मुखीप्रभावं मनसि कृत्वा सृष्टितत्त्वव्याख्यानं भवति। तत्र मञ्जुलसरल-भाषाभ्यां प्रयोगः अस्य अन्यतममाकर्षणम्। तथा च विषयस्य मार्मिकविश्लेषणम् अन्यः एकः उल्लेखनीयः विषयः।

विष्णु एव सृष्टेः मूलम्

विष्णु-पुराणे भगवान् श्रीकृष्ण एवं परंब्रह्म परमात्मास्वरूपः। स रूपवर्णादिरहितः, विनाशरहितः जन्मवर्जितश्च। ब्रह्मणः विष्णोः वा प्रथमप्रकाशः पुरुषरूपः। तदनन्तरं व्यक्ताव्यक्तकालरूपः अर्थात् प्रधानपुरुषव्यक्तकालानां जगत्कारणानामपि कारणम् अयं विष्णुः। विष्णोः पुरुषादिरूपेण प्रकाशः क्रीडारतबालकस्य चेष्टावत् मन्यते विष्णुपुराणे।

अध्यापकः H.H. Wilson महाभागः मतं पोषयति यद् विष्णुपुराणस्य सृष्टितत्त्वं सांख्यदर्शनात् गृह्यते। यद्यपि प्रभावः उल्लेखनीय एव तथापि सांख्यदर्शनवत् विष्णुपुराणे प्रकृतिः स्वाधीना नास्ति। अत्र भगवता विष्णुना उत्पादितेन क्षोभेन जगतः उत्पत्तिः दर्शिता।

---

* प्रोजेक्टफेलो, संस्कृतविभागः गोहाटी विश्वविद्यालयः, गोहाटी, असमः

अत्र सृष्टेः प्रारम्भतत्त्वं विष्णु एव। स हि सृष्टिकाले प्रकृतिपुरुषयोर्मध्ये क्षोभं जनयति येन तौ सृष्टिकार्ये उन्मुखौ भवतः। अर्थात् अत्र विष्णुः न केवलं जगतः कारणम् अपि तु प्रकृत्याः कारणम्। अत एव स एव परं ब्रह्म परमसत्यस्वरूप इति।

यथोक्तम्–

"ब्रह्मस्वरूपिणं देवं जगतो प्रभावाप्यायाम्।" (विष्णु–पुराण, 1.4.5)

तस्माद् जगतः उत्पत्तिः भवति, अपि च काले प्रतिसर्गे समग्रं जगत् तं प्रति एव गच्छति। स स्वभिन्नम् अन्यं किमपि नोत्पादयति। स एव जगत् स्वयम्[1]। स एव स्रष्टा सृष्टश्च। स रक्षकः रक्षितश्च। तथा च स एव ध्वंसकः ध्वंसितश्च। विष्णुः कालरूपेण प्रकृति–पुरुषयोः संयोगं वियोगं सः च घटयति[2]। अर्थात् सृष्टिप्रक्रियायां महत्वपूर्णभूमिकां गृहणाति काल इति स्पष्टतया विष्णुपुराणे उल्लिखितं भवति।

प्रलयकाले प्रकृतेः गुणानां साम्यावस्था अस्ति। प्रकृतिः पुरुषात् वियुक्ता तिष्ठति परन्तु तौ कालरूपौ स्तः। यदा सृष्टिकालः उपस्थितो भवति तदा परमात्मा सः हरिः स्वेच्छया परिणामिन्यां प्रकृतौ एवं अपरिणामिरूपे पुरुषे प्रविष्टः सन् तयोः क्षोभं जनयति। यथा निकटवर्तिगन्धः मनसः चञ्चलतामुत्पादयति तथा परमेश्वरः तयोः क्षोभं जनयति। प्रकृतिगताभ्यां सङ्कोच–विकाशाभ्यां स पुरुषोत्तमः क्षोभ्यः क्षोभकश्च। अर्थात् विष्णुपुराणदिशा पुरुषप्रकृतिकालेषु च केवलं भगवतः विष्णोरेव स्थितिः। स एव सृष्टिस्थितिलयनिमित्तं ब्रह्माविष्णुमहेशरूपसंज्ञां प्राप्नोति। अत एव स विष्णुः वरिष्ठः वरदः एवं च वरेण्यः।[3] स एव परंब्रह्म विष्णुः निराकरः, अक्षराव्ययः रूपादिरहितश्च। सृष्ट्यादिविभिन्नकार्यवशात् च तस्य भिन्नस्वरूपत्वम्। सः सर्वत्र अस्ति समस्तञ्च तस्मिन्नेव वसति अत एव सः वासुदेवः।[4]

विष्णुपुराणे प्रकृतिः

या कार्यकारणशक्तियुक्ता सर्वदा एकरूपा एवम् अव्यक्ता सा सूक्ष्माप्रकृतिरिति ऋषिश्रेष्ठानां कथनम्। तदेव प्रधानम् अन्याश्रयामेयमंजरं, निश्चलं, शब्दस्पर्शविहीनं,

---

1. विष्णोः सकाशात् सम्भूतं जगत् तत्रैव संस्थितम्।
स्थितिसंयमकर्त्ताऽसौ जगतोऽस्य जगच्च सः।। (विष्णुपुराणम्, 1.1.1)
2. विष्णोः स्वरूपात् परतो हि ते द्वे रूपे प्रधानं पुरुषश्च विप्र।
तस्यैव तेऽन्येन धृते वियुक्ते रूपेण यत् तद् द्विज कालसंज्ञम्।। (विष्णुपुराणम्, 1.2.24)
3. य एव सृज्यः स च सर्गकर्त्ता स एव पात्यन्ति च पाल्यते च।
ब्रह्माद्यवस्थाभिरशेषमूर्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः।। (विष्णुपुराणम्, 1.2.70)
4. सर्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते।। (विष्णुपुराणम्, 1.2.12)

रूपरहितं त्रिगुणात्मकञ्च।[1] उल्लेखयोग्यं यत् प्रकृत्याः प्रधान इति संज्ञा। तद् प्रधानम् अनादि, अव्यक्तं, जगतः उत्पत्तिस्थलं तथा च सकलकार्याणां लयस्थलञ्च। सा प्रकृतिः सदसदात्मिका सूक्ष्मा नित्या च।[2] प्रकृतेः महत्वं पुनः प्रदर्शनार्थमेवमुच्यते यत् सृष्टेः पूर्वं प्रलयात् परं च समस्तं जगत् तया व्याप्तमासीत्।[3] वेदज्ञाः ब्रह्मवादिनः उक्तवन्तः यत् प्रलयकाले दिवा–रात्रि–आकाश–भूमि–अन्धकारः किंवा ज्योतिः किमपि नासीत्। बुद्ध्या इन्द्रियेण च अजेयानां प्रकृति–पुरुषयोः ब्रह्मणश्च उपस्थितिरासीत्।[4] महाप्रलयकाले च समग्रं जगत् प्रधानं प्रति एव गच्छति। अत एव तद् प्रधानं प्रकृतिरिति संज्ञां प्राप्नोति[5]। एवं दृश्यते यत् विष्णु–पुराणस्य प्रकृतिस्वरूपेण सांख्यकारिकायाः प्रकृत्याः साम्यमस्ति एव। यथा सांख्ये अपि प्रकृतिः त्रिगुणमयी, अव्यक्ता, सामान्या, विषयात्मिका प्रसवधर्मिणी च।[6] उभयत्र प्रकृतिः कार्यकारणशक्तियुक्ता। अपि च उभयत्र प्रकृत्या जगतः उत्पत्तिः कथिता।

विष्णुपुराणे पुरुषः

विष्णु–पुराणे पुरुषः प्रथमप्रकाशः, सांख्ये तु पुरुषः स्वतंत्र अस्ति। सृष्टिकार्ये अपि विष्णु एव पुरुषः, प्रकृतिं च प्रेरयति इति पूर्वोल्लिखितम् अस्ति। प्रकृति–पुरुषयोः संयोगेन जगतः उत्पत्तिः स्यात्। प्रलयकाले कालस्वरूपेण तौ वियुक्तौ भवतः। सर्गकाले पुरुषेच्छया प्रकृतिसंयोगेन गुणसाम्ये गुणव्यञ्जनं अर्थात् गणवैषम्यं भवति।[7] उल्लेखनीयं यत् प्रधानादि सर्वे प्रकृति–विकृतयः जडाः पुरुषः तु चेतनः। भौतिकसृष्टि–प्रक्रियायां प्रकृत्याः महत्वमधिकं परन्तु पुरुषसंयोगं विना सृष्टिरसम्भवः। अपि च ब्रह्माण्डसृष्टौ अपि पुरुषस्य अधिष्ठानम् आवश्यकम् अस्ति।[8] उल्लेखयोग्यं यत् सांख्यवत् विष्णुपुराणे पुरुषस्य बहुत्वं न सिद्धम्।[9]

---

1. अव्यक्तं कारणं यत् तत् प्रधानमृषिसत्तमैः।
   प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम्।। (विष्णुपुराणम्, 1.2.19)
2. अक्षय्या नान्यदाधारममेयमजरं ध्रुवम्।
   शब्दस्पर्शविहीनं तद् रूपादिभिरसंहितम्।। (विष्णुपुराणम्, 1.2.20)
3. त्रिगुणं तज् जगदयोनिरनादिप्रभवाप्ययम्।
   तेनाग्रे सर्वमेवासीद् व्याप्तं वै प्रलयादनु।। (विष्णुपुराणम्, 1.2.21)
4. नाहो न रात्रिर्न नभो न भूमिर्नासीत् तमो ज्योतिरभच्च नान्यत्।
   श्रोतादिबुद्ध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत्।। (विष्णुपुराणम्, 1.2.23)
5. प्रकृतौ संस्थितं व्यक्तमतीतप्रलये तु यत्।
   तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः।। (विष्णुपुराणम्, 1.2.25)
6. त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि...(सांख्यकारिका 11)
7. गुणसाम्यात् ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने।
   गुणव्यञ्जनसम्भूतिः सर्गकाले द्विजोत्तम।। (विष्णुपुराणम्, 1.2.33)
8. पुरुषाधिष्ठितत्वाच्च प्रधानानुग्रहेण च। महादाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते।। (विष्णुपुराणम्, 1.2.53)
9. प्रधानत्वेन समं त्वचा बीजमिवावृतम्। वैकारिकस्तैजसश्च भूतादिश्चैव तामसः।। (विष्णुपुराणम्, 1.2.35)

विष्णु-पुराणे प्रथमांशे प्रथमेऽध्याये अन्यः एकः पुरुषः उपलभ्यते। स तु महापुरुषः- परमात्मा स्वयं विष्णुः। सृष्टिकार्ये प्रवृत्तः पुरुषः तस्यैव महापुरुषस्य प्रकाशमात्रः। अर्थात् पुरुषः आत्मा, महापुरुषः परमात्मा।

सृष्टिप्रक्रिया

विष्णुः प्रकृतिपुरुषयोः क्षोभस्य जनको भवति। आकाशादौ भूते ब्रह्मादिजीवरूपेण स व्यक्तस्वरूपः। सर्वेश्वराणामपि ईश्वरः। यदा गुणत्रयस्य वैषम्यं जायते तदा असमानायाः सृष्टेः विकाशः जायते। प्रधानं पुरुषस्य (क्षेत्रज्ञस्य) नेतृत्वं करोति। प्रकृत्याः प्रथमविवर्तनं महत्तत्त्वम्। प्रधानेन तदा महत्तत्त्वं तथा आव्रियते यथा बीजं त्वचा।[1] इदं महत्तत्त्वं त्रिविधं भवति। यथा- सात्विकं राजसं तामसञ्च। महत्तत्त्वस्य प्रथमपरिणामः सात्विकः, द्वितीयः तैजसः, तृतीयः भूतादि तामसः वा। एते त्रिविधाः अहंकाराः महत्तत्त्वाद् जायन्ते। त्रिगुणयुक्तत्वात् ये भूतेन्द्रियदेवानां उद्‌भवे हेतवः।[2] एवं यथा प्रधानं महत्तत्त्वं तथा महत्तत्त्वम् अहंकारान् समावृणोति। तदा तामसाहंकारो विकृतो भूत्वा शब्दतन्मात्रं सृजति। शब्दतन्मात्रात् आकाशस्य च स्फुरणं भवति। अयं तामसाहंकारः आकाशं शब्दतन्मात्रञ्च समावृणोति। तदा आकाशः विकृतो भूत्वा स्पर्शतन्मात्रं सृजति। तस्मात् स्पर्शतन्मात्रात् वायोः उत्पत्तिर्जायते। वायुं आकाशः समावृणोति। एवं वायौ क्षोभोत्पन्नेन रूपतन्मात्रं ज्योतिः च जायेते। पुनः वायुः ज्योतेः रूपगुणादिकं ज्योतिं च समावृणोति। तदा ज्योतिः क्षुभितं भूत्वा रसतन्मात्रं सृजति। तस्मात् रसगुणविशिष्टस्य जलस्य सृष्टिः भवति। जलं ज्योतिः समावृणोति। येन जले क्षोभोत्पन्नेन गन्धतन्मात्रस्य सृष्टिः भवति। तस्मात् गन्धतन्मात्रात् सङ्घातजनिता पृथवी जायते। एवं तामसाहंकारात् क्रमशः भूतानां उत्पत्तिः कथ्यते।

पुनः दशेन्द्रियाणां उत्पत्तिः तैजसाहंकारात्, तथा च दशेन्द्रियानां अधिष्ठातृणां देवानां तथा च एकादशेन्द्रियस्य मनसः सात्विकाहंकारात् च उत्पत्तिर्जायते।[3]

पूर्वोल्लिखितानि भूतानि आकाशः-वायुः-तेजः-सलिलं पृथिवी चेमानि उत्तरोत्तरं शब्दस्पर्शादिगुणयुक्तानि। यथा- आकाशस्य विशेषगुणः शब्दः, वायोः स्पर्शः, तेजसः रूपं, सलिलस्य रसः एवं पृथिव्याः गन्धश्च। एतानि पञ्चभूतानि परस्परसंघातेन विना प्रजासृष्टौ अक्षमानि।[4]

---

1. भूतेन्द्रियाणां हेतुः स त्रिगुणत्वान्महामुने।
   यथा प्रधानेन महान् महता स तथावृतः।। (विष्णुपुराणम्, 36.36.9)
2. भूततन्मात्रसर्गोऽयमहंकारात् तु तामसात्।
   तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश।। (विष्णुपुराणम्, 1.2.46)
3. नानावीर्याः पृथगभूतास्ततस्ते संहतिं विना।
   नाशक्नुवन् प्रजाः स्त्रष्टुमसमागम्य कृत्स्नशः।। (विष्णुपुराणम्, 1.2.51)
4. नारिकेलफलस्यान्तबीजं बाह्यदलैरिव।
   जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः।। (विष्णुपुराणम्, 1.2.60-61)

